-N*

CALCUTTA SANSKRIT SERIES
No. 32

# PRĀSĀDA MAṆḌANAM

AND

# RĀJAVALLABHA MAṆḌANAM

OF

SŪTRADHĀRA MAṆḌAN

# प्रासादमण्डनम्

# राजवल्लभमण्डनं च

सूत्रधारमण्डन-विरचितम्

METROPOLITAN PRINTING AND
PUBLISHING HOUSE, LIMITED
CALCUTTA
1948

Price Rs. 10/-

"Aho Shrut Gyanam"

# PRĀSĀDA MANDANAM

AND

# RĀJAVALLABHA MANDANAM

OF

SŪTRADHĀRA MANDAN

# प्रासादमण्डनम्

# राजवल्लभमण्डनं च

सूत्रधारमण्डन-विरचितम्

METROPOLITAN PRINTING AND

PUBLISHING HOUSE, LIMITED

CALCUTTA

1948

Price Rs. 10/-

"Aho Shrut Gyanam"

# CALCUTTA SANSKRIT SERIES

## No. 32

# PRĀSĀDA MAṆḌANAM

AND

# RĀJAVALLABHA MAṆḌANAM

कलिकाता-संस्कृत-ग्रन्थमाला—३२

*All right reserved.*

**First Edition**

**July, 1948**

*Printed and Published by-* **K. V. APPAROW.**
*for and on behalf of*
**The Metropolitan Printing & Publishing House, Ltd,**
*90, Lower Circular Road,*
*Calcutta*

"Aho Shrut Gyanam"

## PUBLISHERS NOTE

We have the pleasure of bringing out another work of Sūtradhār Maṇḍanam, on architecture, Prāsādamaṇḍanam, and Rājavallabha Vāstuśāstra. Śūtradhāra Maṇḍana has to his credit many works on Indian Architecture and Sculpture. This publication mainly deals with the construction of residences, which cannot but evince interest in the public.

The *Rājavallabha Maṇḍana* and some other texts by Maṇḍan, seem to have been very popular. This book was published by Rājā Rādhākānta Deva in his Encyclopædic Dictionary, *Śabda Kalpadruma.* We have also added this text in our present edition, after duly corrected.

We have the pleasure to express our thanks to the Secretary, Asiatic Society of Bengal, for kindly lending us the manuscript.

We have published the bare texts, without any Bhāṣhya, Vārtika, Tātparaya, Yatika, Vṛtti and any miscellaneous indices.

CALCUTTA
25th. June, 1948

MANAGER
CALCUTTA SANSKRIT SERIES

"Aho Shrut Gyanam"

"Aho Shrut Gyanam"

श्रीगणेशाय नमः । श्रीभानूराजते ।

# प्रासादमण्डनम्

## प्रथमोऽध्यायः

[ मङ्गलाचरणम् ]

गणेशाय नमस्तस्मै निर्विघ्नं सिद्धिहेतवे ।
[1]आदिगौरीसमुद्भूतः तेजसं [2]शंभवाय वै ॥ १ ॥
महामायेति या गीता चिन्मयी मुनिसत्तमैः ।
तनोतु वाग्विलासं मे जिह्वायां सा सरस्वती ॥ २ ॥
[3]श्रीसृष्टा[4] सूत्रधारस्य प्रासादा विश्वकर्मणा ।
प्रासादमण्डनं[5] ब्रूते सूत्रधारेषु मण्डनः ॥ ३ ॥
गृहेषु यो विधिः प्रोक्तो विनिवे[6]शे प्रवेशने ।
स एव विधिना कार्यो देवतायतनेष्वपि ॥ ४ ॥
हिमाद्रेरुत्तरे पार्श्वे चारुदारुवनं परम् ।
पावनं शंकरस्थानं तत्र सर्वैः शिवोऽर्चितः ॥ ५ ॥

[ प्रासादानां जात्युद्देशः ]

प्रासादाकारपूजाभिर्देवदैत्यादिभिः क्रमात् ।
चतुर्दश समुत्पन्नाः प्रासादानां च जातयः ॥ ६ ॥

---

1. 'आदिगौरीसमुद्भूततेजसोंऽशभवाय वै'—इति पाठः साधुतया सम्भाव्यते । 'एसियाटिक् सोसाइटी'-लब्ध-हस्तलिखित-पुस्तकद्वयसंवादनया ये पाठभेदाः समुपलब्धाः, तेषु यथासम्भवं सम्यक्तया विवेचितानुपरिष्टाद् ग्रन्थमध्ये गृहीत्वा शिष्टानधो विनिर्दिशामः । अन्तरान्तरा स्वमत्यनुसारेणोन्नीयमानान् पाठानपि 'स्यात्'कारान्तसन्दर्भेण निर्दिशामः । 2. 'श-' । 3. 'श्रीः' इति स्यात् । 4. '-ष्टा' । 5. 'ने' । इह ग्रन्थे प्रायः सर्वत्रैव 'मंडन'-'अंग'-'अंत'-'चितन'-'मंडल'-'मंडोवर-'पंच'-'सिंचन' इत्येवमनुस्वारपूर्वको लेखः, क्वचित्तु 'मण्डोवर' इत्येवमपीत्यैकरूप्यरक्षार्थं सर्वत्रैव 'मण्डन'-'चिन्तना'दिरूपेण वर्गपञ्चमसनाथं मुद्रापितम् । 6. '-श'

"Aho Shrut Gyanam"

[ उत्तमजात्यष्टकम् ]

नागरा द्राविडा चैव भूमिजा लतिनास्तथा ।
[1]सावधारा विमानादिनागराः[2] [3]पुष्पकांतिता ॥ ७ ॥
प्रासा[4]दमिश्रकाश्चैवमष्टौ जातिषु चोत्तमाः ।
सर्वदेवेषु कर्त्तव्याः शिवस्यापि विशेषतः ॥ ८ ॥
प्रासादानां च सर्वेषां जातयो देशभेदतः ।
चतुर्दश प्रवर्त्तन्ते ज्ञेया लोकानुसारतः ॥ ९ ॥
लक्ष्यलक्षणतोऽभ्यासाद् गुरुमार्गानुसारतः ।
प्रासादभवनादीनां सर्वज्ञानमवाप्यते ॥ १० ॥
सुलग्ने [5]शुभनक्षत्रे पञ्चग्रहबलान्विते ।
माससंक्रान्ति[6]वत्सादि(?)निषेधे कालवर्जिते ॥ ११ ॥

[ अथ भूमिनिरूपणम् ]

[7]सर्वदिक्षु प्रवाहां[8] वा प्रागुदक्शंकरप्लवाम्[9] ।
भुवं परीक्ष्य [10]सिञ्चेत पञ्चगव्येन कोविदः ॥ १२ ॥
मणिना स्वर्णरूप्येण विद्रुमेण फलेन वा ।
चतुःषष्टिपदैर्वास्तुं लिखेद्वापि शतांशकैः ॥ १३ ॥
पिष्टेन वाक्षतैरूर्ध्वं ततो वास्तुं समर्चयेत् ।
पूर्वोक्तेन विधानेन बलिपुष्पादिपूजनैः ॥ १४ ॥
[11]इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥ १५ ॥

1. 'सावं-' । 2. '-रां' । 3. 'पुष्पि-' । 4. '-दा' । 5. 'सु-' । 6. '-वारादिनिषेधकालवर्जिते' इति स्यात् । 7. 'सर्वदिक्सुप्रवाहा'मिति स्यात । अलुक्समासो वा कथञ्चित् प्रयोक्तः शिष्टत्वे समाधेयः । 8. -'हो' । 9. '-संकरप्लवाम्' इति स्यात् । 10. 'संचे-' । 11. श्लोकोऽयममरकोषीयः ।

"Aho Shrut Gyanam"

दिक्पालाः क्षेत्रपालाश्च गणेशश्चण्डिका तथा ।
एतेषां विधिवत् पूजां कृत्वा कर्म समाचरेत् ॥ १६ ॥

[ निषिद्धकालकथनम् ]

धनु[1]र्मीनस्थिते सूर्ये गुरुशुक्रेऽस्तगे [2]विधौ ।
वैधृतौ व्यतिपाते [3]च दग्धे नेष्टं कदाचन ॥ १७ ॥
कन्यादित्रित्रिगे[4] सूर्ये द्वारं पूर्वादिषु त्यजेत् ।
[5]सृष्ट्या वत्स[6] मुखं तत्र स्वामिनो[7] हानिकृद्यतः ॥ १८ ॥
आयो व्ययर्क्षमं[8]शस्य भित्तिबाह्ये सुरालये ।
ध्वजायो देवनक्षत्रं व्ययांशौ[9] प्रथमौ[10] शुभौ[11] ॥ १६ ॥
केषां च मरुतां गेहे वृषसिंहगजाः शुभाः ।
हीन आयाद्व्ययः श्रेष्ठः पिशा[12]चस्तु समोऽधिकः ॥ २० ॥
देवतानां गृहे चिन्त्यमायाद्यङ्गचतुष्टयम् ।
नवाङ्गं नाड़िवेधादिस्था[13]पकामरयोर्मिथः ॥ २१ ॥
आयादिचिन्तनं भूमिलक्षणं वास्तुमण्डलम् ।
मासनक्षत्रलग्नादिचिन्तनं पूर्वशास्त्रतः ॥ २२ ॥

[ दिङ्निर्णयप्रकारः ]

रात्रौ दिक्साधनं कुर्यात् दीपसूत्रध्रुवैक्यतः ।
समे भूमिप्रदेशे तु शङ्कुना दिवसेऽथवा ॥ २३ ॥

[ खातविधिः ]

नागवास्तुं समालोक्य कुर्यात् खातविधिं सुधीः ।
पाषाणान्तं जलान्तं वा ततः [14]कूर्मं निवेशयेत् ॥ २४ ॥

1. '-मिने' । 2. 'त्रि-' । 3. 'भे' । 4. '-मे' । 5. 'सृष्ट्वा' इति स्यात् । 6. '-सं' । 7. '-नां' । 8. 'स-' । 9. '-शः' । 10. '-मे' । 11. '-मं' । 12. '-ज-' । 13. '-पि-' । 14. 'कु-' ।

"Aho Shrut Gyanam"

अर्धाङ्गुलो भवेत् कूर्म एकहस्ते सुरालये।
अर्धाङ्गुला ततो वृद्धिः कार्या तिथिकरावधिः ॥ २५ ॥
एकविंशत्करान्तं च तदर्धा वृद्धिरिष्यते।
ततोऽर्धापि शताधान्तं कूर्मो मन्वङ्गुलोत्तमः ॥ २६ ॥
चतुर्थांशाधिको ज्येष्ठः कनिष्ठो हीनयोग्यतः।
सौवर्णो रूप्यजो वापि स्नाप्यः पश्चामृतेन ही[1] ॥ २७ ॥
तिथ्यैर्यवैस्तथा होमं पूर्णां चैव प्रदापयेत्।
ईशाना[2]द्वाग्निकोणाद्वा शिलाः स्थाप्याः प्रदक्षिणाः ॥ २८ ॥
मध्ये कूर्मशिला पश्चाद्गीतवादित्रमङ्गलैः।
बलिदानं च नैवेद्यं विविधान्नं घृतप्लुतम्।
देवताभ्यः सुधीर्दद्यात् [3]कूर्मन्यासे शिलासु च ॥ २९ ॥

इति कूर्मस्थापनम्।

[ अथ सूत्रारम्भकालकथनम् ]

सूत्रारम्भो[4] गृहादीनामुत्तरायां करत्रये।
ब्राह्मे पुष्ये[5] मृगे मैत्रे पौष्ण-वासव-वारुणे ॥ ३० ॥

[ शिलान्यासकालः ]

शिलान्यासस्तु रोहिण्यां[6] श्रवणे[7] हस्तपुष्ययोः।
मृगशीर्षे च रेवत्यामुत्तरात्रितये शुभः[8] ॥ ३१ ॥

[ देवमन्दिरस्थाननिर्वचनम् ]

नद्यां सिद्धाश्रमे तीर्थे पुरे ग्रामे च गह्वरे।
वाटी-वापी-तड़ागादिस्थाने [9]कार्यं[10] सुरालयम् ॥ ३२ ॥
स्वशक्त्या काष्ठमृत्स्नेष्टशैलधातुजरत्नजम्।
देवतायतनं कुर्याद्धर्मार्थकाममोक्षदम् ॥ ३३ ॥

---

1. 'हि' इति स्यात्। 2. '-द्वग्नि-'। 3. 'कूर्मं'। 4. '-म्भौ'। 5. '-ण्ये'। 6. '-ण्यो'। 7. 'णो-'। 8. '-भाः'। 9. 'कार्यः सुरालयः' इति स्यात्। 10. '-र्यं'।

"Aho Shrut Gyanam"

[1]देवतास्थापनं पूजा पापहृद्दर्शनादिकम्।
धर्मवृद्धिर्भवेदर्थः कामो मोक्षस्ततो नृणाम् ॥ ३४ ॥
कोटिघ्नं तृणजे पुण्यं मृन्मये दशसंगुणम्।
[2]इष्टके शतकोटिघ्नं [3]शैलजे तु फलं ग्रहैः ॥ ३५ ॥
कूर्मसंस्थापने द्वारे पद्माख्यायां तु पौरुषे।
घटे ध्वजे प्रतिष्ठायामेवं पुण्याहसप्तकम् ॥ ३६ ॥
भूम्यारम्भे तथा कूर्मे शिलायां सूत्रपातने।
[4]पुरे द्वारोच्छ्रये कुम्भे पट्टे पद्मशिलासु च ॥ ३७ ॥
शुकनासे च पुरुषे घण्टायां कलशे तथा।
[5]ध्वजे च्छाद्ये च कुर्वीत शान्तिकानि चतुर्दश ॥ ३८ ॥
एकहस्तादिप्रासादो यावद्ध[6]स्तशतार्धकम्।
प्रमाणं कुम्भके मूले[7] नासिके भित्तिबाह्यतः ॥ ३९ ॥
कुम्भादिस्थावराणां च निर्गमः समसूत्रतः।
पीठस्य निर्गमो बाह्ये तथैव च्छाद्यकस्य च ॥ ४० ॥
त्रिपञ्चसप्तनवभिः [8]फालनाभिर्विभाजयेत्।
प्रासादमङ्गसंख्या च वारिमार्गान्तरस्थिता ॥ ४१ ॥
फालना कर्णतुल्या स्याद्भद्रं तु द्विगुणं समम्।
सामान्योऽयं विधिस्तुल्यो हस्ताङ्गुलविनिर्गतः ॥ ४२ ॥

इति सूत्रधारमण्डनविरचिते प्रासादमडने वास्तुशास्त्रे
[9]मिश्रकलक्षणे प्रथमोऽध्यायः ॥ १ ॥

---

1. 'देवानां'। 2. 'इष्टे-'। 3. 'शैलेनंतं फलं ग्रहेः'। 4. 'खु-'। 5. 'ध्वजो-'। 6. '-स्तो-'। 7 '-ल-'। 8. 'फले-'। 9. 'मिश्रि-'।

"Aho Shrut Gyanam"

## द्वितीयोऽध्यायः

[ अथ जगतीस्वरूपम् ]

प्रासादानामधिष्ठानं[1] जगती[2] सा निगद्यते ।
यथा सिंहासनं[3] [4]राज्ञा प्रासादस्य तथैव सा ॥ १ ॥
चतुरस्रायताष्टा[5]स्र[6]वृत्तवृत्तायता तथा ।
जगती पञ्चधा प्रोक्ता प्रासादस्यानुरूपतः ॥ २ ॥

[ प्रासादमानभेदेन जगत्या मानभेदः ]

प्रासादपृथुमानाच्च त्रिगुणा च चतुर्गुणा ।
क्रमात् पञ्चगुणा प्रोक्ता ज्येष्ठा मध्या कनीयसा ॥ ३ ॥
कन्यसे कन्यसा ज्येष्ठा ज्येष्ठे मध्ये च मध्यमा ।
प्रासादे जगती कार्या स्वरूपा लक्षणान्विता ॥ ४ ॥
रससप्तगुणा ख्याता जिने पर्यायसंस्थिता ।
द्वारकायां च कर्त्तव्या तथैव पुरुषत्रये ॥ ५ ॥
मण्डपानुक्रमेणैव सपादांशेन सार्द्धतः ।
द्विगुणा वायता कार्या [7]साहस्रायतने विधिः ॥ ६ ॥
त्रिद्व्येकभ्रमसंयुक्ता ज्येष्ठा मध्या कनीयसी ।
उच्छ्रयः सत्रिभागेन भ्रमणीनां समुच्छ्रया[8](?) ॥ ७ ॥
चतुःकोणैस्तथा [9]सूर्यकोणैर्विंशतिकोणकैः ।
अष्टाविंशति-षट्त्रिंशत्-कोणैः स्युः पञ्च फालना (:?) ॥८॥
प्रासादार्धार्कहस्तान्तं[10] त्रिंशे[11] द्वाविंशती च सा ।
द्वात्रिंशती चतुर्थांशो [12]भुजांशोच्चा शतार्द्धके ॥ ९ ॥

---

1. '-ना' । 2. '-ति' । 3. '-ने' । 4. 'राज्ञा'मिति स्यात् । 5. '-स्ता' । 6. 'वृत्तावृंता यथातथा' । 7. 'स-' । 8. '-यां' । 9. 'सूर्यै-' । 10. '-न्त-' । 11. '-शो-' । 12. 'भूताशौचा' ।

"Aho Shrut Gyanam"

एकहस्ते करेणोच्चा साध्यर्धं सा चतुःकरे ।
सूर्य[1]जेन शतार्धान्तं क्रमाद्द्वित्रियुगांशकैः ॥ १० ॥
तदुच्छ्रायं भजेत् प्राज्ञस्त्वष्टाविंशतिभिः पदैः ।
त्रिपदो जाड्यकुम्भश्च द्विपदं कणकं तथा ॥ ११ ॥
पद्मपत्रसमायुक्ता त्रिपदा सरप[2]त्रिका ।
द्विपदं खुरकं कुर्यात् सप्तभागं च कुम्भकम् ॥ १२ ॥
कलशस्त्रिपदा प्रोक्तो भागेनान्तरपत्रकम् ।
कपोतालिस्त्रिभागे च पुष्पकण्ठो युगांशकैः ॥ १३ ॥
पुष्पका जाड्यकुम्भश्च निर्गमश्चाष्टभिः पदैः ।
कर्णेषु च [3]दिशापालाः [4]प्राच्यादिषु प्रदक्षिणाः[5] ॥ १४ ॥
प्राकारैर्मण्डिता कार्या चतुर्भिर्द्वारमण्डपैः ।
मकरैर्जलनि[6]ष्कासैः सोपानैस्तोरणादिभिः ॥ १५ ॥
मण्डपाग्रे प्रतोल्यग्रे सोपानं शुण्डिकायतः ।
तोरणं कारये[7]त्तस्य [8]पट्टं पट्टानुसारतः ॥ १६ ॥

[ तोरणविधिः ]

तोरणस्योभयस्तम्भविस्तरं गर्भमानतः ।
भित्तिगर्भप्रमाणेन · तयोर्मध्येऽथवा [9]भवेत् ॥ १७ ॥
वेदिकापीठरूपैश्च शोभाभिर्बहुभिर्युतां(?) ।
त्रिचित्रतोरणं कुर्याद् दोला[10] देवस्य तत्र च ॥ १८ ॥
प्रासादाद्वाहनस्थाने करणीया चतु[11]ष्किका ।
एक-द्वि-त्रि-चतुः-पञ्च-रस-सप्तपदान्तरे ॥ १९ ॥

1. '-जै-' । 2. '-त्ति-' । 3. 'दिसां पालाः । 4. 'प्राच्यास्यादिषु' । 5. '-णे' ।
6. '-क्र-' । 7. '-यस्त' । 8. '-पटपटानु-' । 9. '-रभ-' । 10. '-ले' । 11. '-ष्ठिका' ।

"Aho Shrut Gyanam"

[ देवमन्दिरे वाहननिर्माणविधिः ]

अर्चाया[1]मनवांशे तु पञ्चषट्सप्तभागिकः ।
गुह्यनाभिस्तनान्तं वा त्रिविधो वाहनोदयः ॥ २० ॥
पादजानुकटीयावदर्चाया वाहनस्य दृक् ।
वृषस्य विष्णुभागान्ते[2] सूर्ये व्योमस्तनान्तकम् ॥ २१ ॥
जिनाग्रे [3]संवरेणाग्रे शुकाग्रे [4]गूढमण्डपे ।
[5]गूढस्याग्रे चतुष्काद्यास्तदग्रे नृत्यमण्डपम् ॥ २२ ॥
द्विसप्तत्या द्विबाणैर्वा चतुर्विंशतितोऽपि वा ।
जिनालये चतुर्दिक्षु सहितं जिनमन्दिरम् ॥ २३ ॥
मण्डपाद् [6]गर्भसूत्रेण वामदक्षिणयोर्दिशोः ।
अष्टापदं प्रकर्त्तव्यं त्रिशाला वा बलाणकम् ॥ २४ ॥
अपरे रथशाला च [7]मठं याम्ये प्रकीर्त्तितम् ।
उत्तरे रथरन्ध्रं च प्रोक्तं श्रीवि[8]श्वकर्मणा ॥ २५ ॥
[9]जगती तादृशी कुर्यात् प्रासादो यादृशो भवेत् ।
भिन्नच्छन्दा न कर्त्तव्या प्रासादासनसंस्थिता ॥ २६ ॥

इति प्रासादजगती ।

अग्रतः पृष्ठतश्चैव [10]वामदक्षिणतोऽपि वा ।
प्रासादं कारयेदन्तर्नाभि[11]वेधविवर्जितम् ॥ २७ ॥
[12]लिङ्गाग्रे न तु कर्त्तव्या अर्चारूपेण देवता ।
प्रभा नष्टा न भोगाय यथा तारा दिवाकरे[13] ॥ २८ ॥

---

1. '-मे' । 2. '-गंते' । 3. 'संमसणें' । 4. 'मू-' । 5. 'गूढस्येति'वा 'गृहस्ये'ति वा युक्तमिति चिन्त्यम् । 6. 'दर्भ-' । 7. 'मठयामे' । 8. '-स्व-' । 9. 'श्लोकोऽय'मेकस्मिन् पुस्तके नास्ति । 'जगतीं तादृशी'मिति वा 'कार्या' इति वा स्यात् । 10. 'वाप्र-' । 11. 'वें-' । 12. अयं श्लोको देवतामूर्त्तिप्रकरणेऽपि ( ३।१८ ) समानः । अत्र च व्याख्यान्तरमभिसन्धाय संशोधनप्रयासो न क्रियते । लिङ्गाग्रे प्रतिमानिर्माणे प्रभा कान्तिर्नष्टा सती भोगाय दर्शकानामुपभोगाय कर्त्तुर्वा सम्पदे न भवतीत्यर्थः ; अन्यत् समानम् । द्वितीयार्थस्योपमानांशेऽनन्वयेऽपि न क्षतिः, अर्थभेदेऽप्यानुपूर्वीसाम्येनैवोपमाकृत्यनिर्वाहात् । 13. '-वारके ।

"Aho Shrut Gyanam"

शिवस्याग्रे शिवं कुर्यात् ब्रह्माणं ब्रह्मणोऽग्रतः ।
विष्णोरग्रे भवेद्विष्णुर्जिनो [1]जैने रवेरविः ॥ २९ ॥
ब्रह्मा विष्णुरेकनाभिर्द्वाभ्यां दोषो न विद्यते[2] ।
शिवस्याग्रेऽन्यदेवस्य दृष्टिवेधे महद्भयम् ॥ ३० ॥
प्रसिद्धराजमार्गस्य प्राकारस्यान्तरेऽपि वा ।
स्थापयेदन्यदेवश्च (श्च ?) तत्र दोषो न विद्यते ॥ ३१ ॥

[ स्नानोदकनिर्गममार्गे विशेषः ]

शिवस्नानोदकं गूढमार्गे चण्डमुखे क्षिपेत् ।
दृष्टं न लङ्घयेत्तत्र हन्ति पुण्यं पुराकृतम् ॥ ३२ ॥
एका चण्ड्या रवेः सप्त तिस्रो दद्याद्विनायके ।
चतस्रो वासुदेवस्य शिवस्यार्धा प्रदक्षिणा ॥ ३३ ॥
[3]अग्रतो जिनदेवस्य स्तोत्रमन्त्रार्चनादिकम् ।
कुर्यान्न दर्शयेत् [4]पृष्ठं संमुखं द्वारलङ्घनम् ॥ ३४ ॥

[ प्रणालविधिः ]

पूर्वापरामुखे द्वारे प्रणालं शुभमुत्तरे ।
इति शास्त्रविचारोऽयमुत्तरेशानदेवताः ॥ ३५ ॥
मण्डपे ये स्थिता देवास्तेषां वामे च दक्षिणे ।
प्रणालं कारयेद्धीमान् जगत्यां च चतुर्दिशम् ॥ ३६ ॥

[ देवतास्यस्थापने दिङ्नियमः ]

पूर्वापरास्यं देवानां कुर्यान्नो दक्षिणोत्तरम् ।
ब्रह्मविष्णुशिवार्केन्द्र[5]गुहाः पूर्वापराङ्मुखाः ॥ ३७ ॥
नगराभिमुखाः श्रेष्ठा मध्ये [6]वाह्ये च देवताः ।
गणेशो धनदो लक्ष्मीः पुरद्वारे सुखावहाः ॥ ३८ ॥

---

1. पदमिदमेकत्र पुस्तके नास्ति । 2. 'जिने दोषो न विद्यते' इति देवतामूर्त्तिप्रकरणे पाठः । 3. 'एकस्मिन् पुस्तके ३४-३५ श्लोकयोः पौर्वापर्यविपर्ययो दृश्यते । 4. 'पृष्ठ-' । 5. 'गुहपूर्वापराङ्मुखाः' । 6. 'ब्राह्मे' ।

प्रासाद—२

"Aho Shrut Gyanam"

विघ्नेशो भैरवश्चण्डी नकुलीशो ग्रहास्तथा ।
मातरो धनदश्चैव शुभा दक्षिणदिङ्मुखाः ॥ ३९ ॥
नैऋत्याभिमुखः[1] कार्यो हनुमान् वान[2]रेश्वरः ।
अन्ये विदिङ्मुखा देवा न कर्त्तव्याः कदाचन ॥ ४० ॥

इति देवतानां दृष्टिदो[3]षदिग्विभागः

सूर्याद् गणेशो विष्णुश्च चण्डी शम्भुः प्रदक्षिणे ।
भानोर्गृहे ग्रहास्तस्य गणा द्वादश मूर्त्तयः ॥ ४१ ॥

इति सूर्यः ।

गणेशस्य गृहे तद्वच्चण्डी शम्भुर्हरी रविः ।
मूर्त्तयो द्वादशान्येऽपि गणाः स्थाप्या हिता[4]श्च ये ॥ ४२ ॥

इति गणेशायतनम् ।

विष्णोः प्रदक्षिणे नैव गणेशोऽर्कोऽम्बिका शिवः[5] ।
गोप्य(१?)स्तस्यावतारस्य मूर्त्तयो [6]द्वारकां तथा ॥ ४३ ॥

इति विष्णवायतनम् ।

चण्ड्याः शम्भुर्गणेशोऽर्को विष्णुः स्थाप्याः प्रदक्षिणाः ।
मातरो मूर्त्तयो देवा योगिन्यो भैरवादयः ॥ ४४ ॥

इति चण्डिकायतनम् ।

शम्भोः सूर्यो गणेशश्च चण्डी विष्णुः प्रदक्षिणे ।
स्थाप्याः सर्वे शिवस्थाने दृष्टिवेधविवर्जि[7]ताः ॥ ४५ ॥

इति शिवायतनम् ।

रुद्रस्त्रिपुरुषो मध्ये रुद्राद्वामगतो हरिः ।
दक्षिणाङ्गे भवेद् ब्रह्मा विपर्यासे भयावहाः ॥ ४६ ॥
रुद्रवक्त्रविभागेन हरिरर्द्धे पितामहः ।
तत्तुल्या पार्वती देवी सुखदा सर्वकामदा ॥ ४७ ॥

इति त्रिपुरुषन्यासः ।

इति प्रासादमण्डने जगतीदृष्टिदोष-आयतनाधिकारे
द्वितीयोऽध्यायः ॥ २ ॥ * श्रीः

---

1. '-खा, । २. '-रै-' । 3. '-षा-' । 4. 'श्रये' । 5. '-वा' । 6. 'द्वा-' । 7. -'ताः' ।

"Aho Shrut Gyanam"

# तृतीयोऽध्यायः

[ अथ आधारशिला-भिट्टादिनिर्माणोपदेशः ]

अतिस्थूला सुविस्तीर्णा प्रासादाधारिणी शिला ।
[1]अतीव सुदृढ़ा कार्या इष्टकाचूर्णवारिभिः ॥ १ ॥
शिलोपरि भवे[2]द्भिट्टमेकहस्ते युगाङ्गुलम् ।
अर्द्धाङ्गुला भवेद् वृद्धिर्यावद्धस्तशतार्द्धकम् ॥ २ ॥
अङ्गुले[3]नांशहीनेन अर्धेनार्धेन च क्रमात् ।
पञ्च-दिक्-[4]विंशतिर्यावच्छताधँ च विवर्धयेत् ॥ ३ ॥
एक-द्वि-त्रीणि भिट्टानि हीनहीनाति(नि?) कारयेत् ।
स्व-स्वोदयप्रमा[5]णस्य चतुर्थांशेन निर्गमः ॥ ४ ॥

इति भिट्टः

[ अथ पीठनिर्माणोपदेशः ]

[ श्रीः ] पीठमर्धं त्रिपादांशैरेकद्वित्रिकरे गृहे ।
चतुर्हस्ते त्रिसार्धांशं पादांशं [6]पञ्चहस्तके ॥ ५ ॥
दश-विंशति-षट्त्रिंशत्-शतार्धं हस्तकावधिः ।
[7]वृद्धिर्वेदत्रियुग्मैकसंख्या स्यादङ्गुलैः क्रमात् ॥ ६ ॥
पञ्चाशहीन(?)माधिक्यमेकैकं तु त्रिधा पुनः ।
त्रिपञ्चाशत् समुत्सेधे द्वाविंशत्यंशनिर्गमे ॥ ७ ॥
नवांशो जाड्यकुम्भश्च सप्तांशं कणकं भवेत् ।
सान्तरं सकपोतालिः [8]सप्तांशा ग्रासपट्टिका: ॥ ८ ॥

---

1. 'इति वस्तुदृढ़ा' । २. '-द्भिद-' । ३. '-न सही-' । 4. 'व्यंशतं' । 5. '-णे-' ।
6. 'पंचाहशस्तके' । 7. 'वृधिर्वेद-', 'वृद्धिर्वद-' । 8. 'सत्यां-' ।

"Aho Shrut Gyanam"

सूर्य-दिग्-[1]वसुभागैश्च गजवाजिनराः क्रमात् ।
वाजिस्थाने[2]ऽथवा कार्यं स्वं स्वं देवस्य वाहनम् ॥ ९ ॥
[3]पञ्चांशा कर्णिकाग्रे तु निर्गमो जाड्यकुम्भकम् ।
त्रिसार्द्धे [4]कणकं सार्धं चतुर्भिर्ग्रासपट्टिका ॥ १० ॥
कुञ्जराश्च नरा वेदा राम[5]युग्मं च निर्गमः[6] ।
अन्तरालमधस्तेषामूर्ध्वाधः[7] कर्णयुग्मकम् ॥ ११ ॥
गजपीठं विना स्वल्पद्रव्ये [8]पुण्यं महत्तरम् ।
जाड्यकुम्भः कणाली च ग्रासपट्टी तदा भवेत् ॥ १२ ॥
कामदं कणपीठं च जाड्यकुम्भः कणालिका ।
लतिने निर्गमे हीने साधारे निर्गमाधिकम् ॥ १३ ॥
सर्वेषां पीठमाधारः पीठहीनं निराश्रयम् ।
पीठहीनं विनाशाय प्रासादभुवनादिकम् ॥ १४ ॥

इति पीठम् ।

हस्तादिपञ्चपर्यन्तं विस्तारे[9]णोदयः समः ।
स क्रमान्नव[10]सत्येषुरामचन्द्रोऽङ्गुलाधिकः ॥ १५ ॥
पञ्चादिदशपर्यन्तं त्रिंशद्यावच्छताधकम् ।
हस्ते हस्ते क्रमाद्वृद्धिः मनुसूर्यनवाङ्गुला ॥ १६ ॥
एकहस्तादिपञ्चान्तं पृथुत्वेनोदयः समाः(मः?) ।
हस्ते सूर्याङ्गुला वृद्धिर्यावत् विंशत्करावधि ॥ १७ ॥
नवाङ्गुला करे वृद्धिर्यावद्धस्तशतार्धकम् ।
पीठोर्द्धे [11]उदयश्चैवं च्छाद्य(द्य?)न्ते नागरादिकम् ॥ १८ ॥

---

1. 'वल्तु-' । 2. 'तथा' । 3. 'पंचाशा' । 4. '-र्द्धं' । 5. '-रमं' । 6. '-मा' । 7. '-यः' । 8. 'पुण्ये' । 9. 'यादपः' । 10. '-सप्तेषुराम-चन्द्राङ्गुलाधिकः' इति स्यात् । 11. 'उदंश्चैव' ।

"Aho Shrut Gyanam"

एकविंशत्(?)पञ्चशते प्रासादस्य समुच्छ्रयः ।
पञ्चादिनवभागान्तं पीठस्य पञ्चधोदयः ॥ १९ ॥
वेदवेदेन्दुभक्ते तु च्छाद्यन्ते(?)पीठमस्तकात् ।
[1]खुरकः पञ्चभागं स्याद्विशती कुम्भकस्तथा ॥ २० ॥
कलशोऽष्टौ द्विसार्धं तु कर्त्तव्यं मन्तरालकम्[2] ।
कपोतिकाष्टौ [3]मञ्ची स्यात् कर्त्तव्या नवभागिका ॥ २१ ॥
पञ्चत्रिंशत्पदा जङ्घा तिथ्यंशैरुद्गमो भवेत् ।
[4]वसुभिर्भरणी कार्या शिरापट्टो दशांशिका ॥ २२ ॥
अष्टांशोर्धा कपोतालि(ः?)द्विसार्धं मन्तरालकम् ।
[5]च्छाद्यं त्रयोदशांशोच्चं दशभागैर्विनिर्गमः ॥ २३ ॥

इति मण्डोवरः ।

मेरुमण्डोवरे मञ्ची [6]भवण्युर्द्धे[7]ष्वभागिका[8] ।
पञ्चविंशतिका जङ्घा उद्गमश्च त्रयोदशः ॥ २४ ॥
अष्टांशा भरणी शेषं पूर्ववत् कल्पयेत् सुधीः ।
सप्तभागा भवेन्मञ्ची [9]कुटच्छाद्यस्य मस्तके ॥ २५ ॥
षोड़शांशा पुनर्जङ्घा भरणी [10]सत्यभागिका ।
शिरावटी चतुर्भागा [11]पट्टस्यात्यं च भागिकः ॥ २६ ।
सूर्यांशैः कूटच्छाद्यश्च सर्वकामफलप्रदम् ।
कुम्भकस्य युगांशेन स्थावराणां प्रवेशकः ॥ २७ ॥

इति मेरु[12]मण्डोवरः । श्री ।

1. 'पु' । 2. 'सान्तरालक'मिति स्यात ? । 3. 'मन्वी' । 4. 'वस्तु-' । 5. 'त्रयोदशांशोच्चं छाद्यं' । 6. 'भरण्यूर्द्धं' इति स्यात । 7. 'वृ' । 8. 'कं' । 9. 'कुंठ-' । 10. 'सप्तभागिका' इति स्यात् । 11. 'पट्टः स्यात्पंचभागिकः' इति स्यात् । 12. '-री-' ।

"Aho Shrut Gyanam"

शिरावल्युद्गमो भागे जङ्घारूपाणि वर्जयेत् ।
अल्पद्रव्ये महत् पुण्यं कथितं विश्वकर्मणा ॥ २८ ॥

*इति सामान्यमण्डोवरः ।*

पीठतः च्छाद्यपर्यन्तं सप्तविंशतिभाजिते ।
द्वादशानां [1]खुरकादीनां भागसंख्या क्रमेण तु ॥ २९ ॥
स्यादेकवेदसार्धाद्धि सार्धस्यार्धाष्टभिस्त्रिभिः ।
सार्धस्यार्धार्धभागैः स्याद्दिसार्धैर्द्व्यशनिर्गमः ॥ ३० ॥

इति प्रकारान्तरेण मराडोवरः । श्रीः ।

पादांशेनेष्टके पञ्चष[2]डंशैः [3]शैलदारुजे ।
(?)सार्धो[4]रिष्टांशतो[5] भित्तिर्दशांशैर्धातुरत्नजे ॥ ३१ ॥
मध्ये युगास्त्रं भद्राढ्यं[6] सुभद्रं प्रतिभद्रकम् ।
फालनीयं गर्भगृहं दोषदं गर्भमायतम् ॥ ३१ ॥
कुम्भकेन[7] समा कुम्भो स्तम्भप्रान्ते [8]न तूद्गमः ।
भरण्या भरणं शीर्षं कपोताल्या समं भवेत् ॥ ३३ ॥
[9]पेड़के कुठ(ट?)च्छाद्यस्य कुर्यात् पट्टस्य पेटकम् ।
सषडंश-सपादस्य सार्धो गर्भस्य विस्तरात् ॥ ३४ ॥
वृहद्देवालये [10]पट्टे पेटान्तं हि [11]त्रयोदयः ।
भजेदष्टाभिरेकांशा कुभिस्तम्भोर्द्ध्वपञ्चभिः(?) ॥ ३५ ॥
[12]अर्धेन भरणीशीर्षमेकपट्टस्तु सार्धकम् ।
व्यासार्धेन [13]करोटं स्याद्द्वयो विषमाश्रुता ॥ ३६ ॥

इति गर्भगृहोदयप्रमाणम् । श्रीः ।

1. 'खुरा-' । 2. 'ड्शै' । 3. 'शैज-' । 4. '-रे-' । 5. '-ता' । 6. '-द्यं' । 7. '-त-' । 8. 'जतु' । 9. 'पटेके' । 10. 'पट्ट-' । 11. 'त्रिदोदय' । 12. 'अर्थन' । 13. 'करा-' ।

"Aho Shrut Gyanam"

मूलकर्णैश्च सूत्रेण कुम्भेनोदुम्बरः समः ।
तदधः पञ्च रत्नानि स्थापये(त्?) शिल्पिपूजनात् ॥ ३७ ॥

द्वारव्यासे त्रिभागेन मध्ये मन्दारको भवेत् ।
वृत्तं मन्दारकं कुर्यात् मृणा[1]लं पद्मसंयुतम् ॥ ३८ ॥

जाड्यकुम्भः कणाली च कीर्त्तिवक्त्रद्वयं तथा ।
उदुम्बरस्य पार्श्वे च शाखायां स्तलरूपकम् ॥ ३९ ॥

कुम्भस्यार्धे त्रिभागे वा पादहीन उदुम्बरः ।
तद्वयं [2]कङ्कणं मध्ये पीठके बाह्यभूमिका ॥ ४० ॥

इति उदुम्बरः । श्रीः ।

खुरकेण समं कुर्यादर्धं चन्द्रस्य चोच्छ्रितः[3] ।
द्वारव्याससमं दैर्घ्यं निर्गमश्च तदर्धतः ॥ ४१ ॥

द्विभागमर्धचन्द्रश्च भागेन द्वौ गगा[4]रिकौ ।
शंखपत्रसमायुक्तं पद्माकारैरलङ्कृतम् ॥ ४२ ॥

इति अर्धचन्द्रः ।

एकहस्ते तु प्रासादे द्वारं स्यात् षोड़शाङ्गुलम् ।
षोड़शाङ्गुलिका वृद्धिर्यावद्धस्तचतुष्टयम् ॥ ४३ ॥

अष्टहस्तांशकं यावत् दीर्घे वृद्धिर्गुणाङ्गुला ।
द्व्यङ्गुला प्रतिहस्ते च यावद्धस्तशतार्धकम् ॥ ४४ ॥

यानवाहनपर्यङ्कद्वारप्रासादसद्म[5]नाम् ।
दैर्घ्यार्धेन पृथुत्वे स्याच्छोभनं तत् कलाधिकम् ॥ ४५ ॥

इति नागरप्रासादद्वारम् । श्रीः ।

---

1. '-ल-' । 2. कर्णमध्ये' । 3. '-तिः' । 4. '-र-' । 5. '-मं' ।

"Aho Shrut Gyanam"

एकहस्ते सुरागारे द्वारं सूर्याङ्ग[1]लोदयम् ।
सूर्याङ्गुला प्रती(ति ?)[2]करं वृद्धिः पञ्चकरावधिः ॥ ४६ ॥

पञ्चाङ्गुला च सप्तान्तं द्व्यङ्गुला तु शतार्धके ।
नवान्तं स्याद्यु[3]गाङ्गुलं वृद्धिः कार्या करं प्रति ॥ ४७ ॥

इति भूमिजे द्वारम् । श्रीः ।

प्रासादे एकहस्ते तु द्वारं कुर्याद्दशाङ्गुलम् ।
रस[4]हस्तान्तकं यावत्तावता वृद्धिरिष्यते ॥ ४८ ॥

पञ्चाङ्गु[5]लं दशान्तश्च द्व्यङ्गुलं वा शतार्द्धकम् ।

इति द्राविडे द्वारम् । श्रीः ।

विमाने भौमजे मानं विराटेषु तथैव च ।
मिश्रके लतिने चैव प्रशस्ते नागरोद्भ[6]वम् ॥ ४९ ॥

विमाननागरच्छन्दे कुर्याद् विमानपुष्पके ।
सिंहावलोकने द्वारे नागरं शोभनं मतम् ॥ ५० ॥

वलभ्यां भौमजं मानं [7]कासाकारेषु द्राविड़ः ।
धातुजे रत्नजे चैव दारुजे च रथारुहे ॥ ५१ ॥

इति द्वारप्रमाणम् ।

नव[8]शाखं महेशस्य देवानां सप्तसा(शा?)खिकः ।
पञ्चसा(शा?)खं सार्वभौमे त्रिशाखं मण्डलेश्वरे ॥ ५२ ॥

एकशाखं भवेद्द्वारं शूद्रे वैश्ये द्विजे सदा ।
समशाखश्च धुमाये स्वा(श्वा?)न[9]रासभवायसे ॥ ५३ ॥

1. '-ला' । 2. '-काल-' । 3. '-गांगु-' । 4. 'जेजत्तकं'(?) । 5. '-लाद्द' । 6. '-व' । 7. 'फा-' । 8. 'शांखं' । 9. 'रांभ-' ।

"Aho Shrut Gyanam"

त्रिपञ्चसप्तनन्दाये शाखास्युरङ्गतुल्यका[1] ।
हीनशाखं न कर्त्तव्यमधिकाद्यं सुखावहम् ॥ ५४ ॥
अङ्गुलं [2]साधमधं वा कुर्याद्धीनं तथाधिकम् ।
आयदोषविशुद्धार्थं [3]ह्रासो वृद्धिर्न [4]दूष्यते ॥ ५५ ॥
चतुर्भागाङ्कितं कुर्याच्छाखाविस्तारमानकम् ।
मध्ये द्विभागिकं कुर्यात् स्तम्भं पुरुषसंज्ञकम् ॥ ५६ ॥
त्रिसंज्ञका भवेत् शाखा पार्श्वतो भागभागिका ।
निर्गमे चैकभागेन रूपस्तम्भः प्रशस्यते ॥ ५७ ॥
एकांशं सार्धभागं च पाशेन(?) द्वयमेव च ।
द्विभागं निर्गमे कुर्यात् स्तम्भद्रव्यानुसारतः ॥ ५८ ॥
[5]पोटके विस्तरं कार्यं प्रवेशस्य युगांश[6]कम् ।
कोणिका स्तम्भमध्ये तु भूषणार्था[7] हि पार्श्वतः ॥ ५९ ॥
[8]द्वारदैर्घ्यं चतुर्थांशे द्वारपालो विधीयते ।
स्तम्भशाखा[9]द्विकं शेषे त्रिशाखं विधिभाजयेत्(?) ॥ ६० ॥

इति त्रिशाखम् । श्रीः ।

पत्रशाखा च गन्धर्वा रूपस्तम्भस्तृतीयके ।
चतुर्थी <u>स्वल्पसा(शा?)खा</u> च सिंहसा(शा?)खा च पञ्चमी ॥६१॥

इति पञ्चशाखा ।

प्रथमा पत्रशाखा च गन्धर्वा रूपशाखिका ।
चतुर्थी स्तम्भशाखा च रूपशाखा च पञ्चमी ॥ ६२ ॥

1. 'शाखाः स्युरङ्गतुल्यकाः' इति स्यात् । 2. 'सार्धमर्धं वा' इति स्यात् । 3. 'कुश्वक्'(?) । 4. 'दूषि-' । 5. 'पोठ-' । 6. '-के' । 7. '-र्थ' । 8. 'द्वारदैर्घ्यचतुर्थांशे' इति स्यात् । 9. '-द्वि' ।



"Aho Shrut Gyanam"

षष्ठी तु[1] श(स्त्र ?)ल्पसा(शा?)खा च सिंहशाखा च सप्तमी ।
स्तम्भशाखा भवेन्मध्ये रूपशाखाग्रसूत्रतः ॥ ६३ ॥

इति सप्तशाखा ।

पत्रगन्धर्वसंज्ञा च रूपस्तम्भतृ(स्तृ?)तीयके ।
चतुर्थी शल्पशाखा च गन्धर्वा त्वथ पञ्चमी ॥ ६४ ॥
रूपस्तम्भस्तथा षष्ठी रूपशाखा ततः परा ।
शल्पशाखा च सिंहाख्या मूलकर्णेन सम्मिता ॥ ६५ ॥
यस्य देवस्य या मूर्त्तिः सैव कार्योत्तराङ्के ।
शाखायाश्च [2]परिवारो गणेशश्चोत्तराङ्के ॥ ६६ ॥

इति नवशाखा ।

इति प्रासादमण्डने वास्तुशास्त्रे पीठे(ठ ?)मण्डोवरगर्भगृ[3]होदुम्बरप्रमाणं तृतीयोऽध्यायः । ३ । श्रीः ।

---

1. 'पंच' इत्यधिकः पाठः एकस्मिन् पुस्तके दृश्यते । 2. 'परी' इति स्यात् । 3. '-हा उदु' ।

"Aho Shrut Gyanam"

# चतुर्थोऽध्यायः

द्वारोच्छ्रायोऽष्टनवधा भागमेकं परित्यजेत् ।
शेषे त्र्यंशे द्विभागार्चा[1] [2]त्र्यंशोना द्वारतोऽथवा ॥ १ ॥
द्वारदैर्घ्ये तु तिथ्यंशे तिथिशक्रकलांशकैः ।
[3]ऊर्ध्वार्धा आसनस्था च मनुविश्वार्कभागतः ॥ २ ॥
चतुरस्त्री(स्त्रो?)कृते क्षेत्रे दशभागविभाजिते ।
भित्तिर्द्विभा[4]ग(ा?) कर्त्तव्या षड्भागं गर्भमन्दिरम् ॥ ३ ॥
तृतीयांशेन गर्भस्य प्रासादे प्रतिमोत्तमा ।
मध्यमा स्व[5]दशांशोना पञ्चांशोना क[6]नीयसी ॥ ४ ॥
आयभागैर्भजेद्वा(द्वा?)रमष्टमं [7]तूर्ध्वतस्त्यजेत् ।
सप्तमा सप्तमे [8]षष्ठी वृषे सिंहे ध्वजे शुभा ॥ ५ ॥
षष्ठभागस्य [9]पञ्चांशे लक्ष्मीनारायणादिदृक् ।
[10]शयनार्चांशलिङ्गानि द्वारा[11]र्धेन व्यतिक्र[12]मात् ॥ ६ ॥
[13]यदार्धे यक्षभूताद्या प(य?)दाग्रे सर्वदेवताः ।
तद(ा?)ग्रे वैष्णवं ब्रह्मा मध्ये लिङ्गं शिवस्य च ॥ ७ ॥

इति प्रतिमाप्रमाण-[14]दृष्टि-पदस्थापनम् ।

च्छाद्यस्योर्द्ध्वे प्रहार(ः?) स्यात् शृङ्गे शृङ्गे तथैव च ।
प्रासादा(?)शृङ्गशृङ्गेषु अधोभागे तु च्छाद्यकम् ॥ ८ ॥
मूलकर्णे रथादौ वा एकद्वित्रिक[15]मान्न्यसेत् ।
निराधारे मूलभित्तौ साधारे भ्रमभित्तिषु ॥ ९ ॥

---

1. 'च' । 2. 'त्र्यंशे-' । 3. 'अर्चाया' । 4. 'भागो कर्त्तव्यो' । 5. '-द्द-' ।
6. '-ग्री-' । 7. 'तूर्द्ध' । 8 'दृष्टि' । 9. 'पंचाशे' । 10. 'शयचेश'(?) ।
11. '-र्धं' । 12. '-मे-' । 13. 'पद्वार्धेपिक्षभूताद्याः' । 14. 'ष्टी' । 15. '-मान्या' ।

"Aho Shrut Gyanam"

उरुशृङ्गाणि भद्रेषुरेकादिग्रहसङ्ख्यया ।
त्रयोदशार्द्धे सप्तार्द्धे लुप्तानि [1]चोरुशृङ्गकैः ॥ १० ॥
रेखामूले च दिग्भागे[2] कुर्यादग्रे षडंशकम् ।
षड्बाह्ये दोषदं प्रोक्तं पञ्चमध्ये न शोभनम् ॥ ११ ॥

[ शिखरनिर्माणोपदेशः ]

सपादं शिखरं कार्यं सकर्णं शिखरोदयम्[3] ।
सपादकर्णयोर्मध्ये [4]रेखाः स्युः पञ्चविंशतिः ॥ १२ ॥
[5]प्रोक्ता रेखा(:?) कलाभेदैर्वलनैः पञ्चविंशतिः ।
पञ्चादिनवयुग्मान्तं खण्डानि तेष्वनुक्रमात् ।
अंशवृद्धया कलाः कार्या दैर्घ्ये स्कन्धेऽपि तत्समा(:?) ॥१३॥
अष्टा[6]दावसुषष्ठ्यन्तं चतुर्वृद्धया तु षोड़शम् ।
दैर्घ्यतुल्याः [7]कलाः स्कन्धे [8]एकहीनास्तु षोड़श ॥ १४ ॥
ऊर्ध्वा अष्टादशांशा(:?) स्युस्तिर्यक् षोड़श एव च ।
[9]चक्रेऽस्मिन् सम्भवत्येव रेखाणां षट्[10]शतद्वयम् ॥ १५ ॥
[11]त्रिखण्डात् खण्डवृद्धिश्च यावदष्टादशैव हि ।
एकैकांशे कलाष्टौ च समाचार्यस्य षोड़श ॥ १६ ॥
द्वितीयप्रथमे खण्डे कालाष्टौ द्वितये नव ।
तृतीये दशखण्डे[12]षु शेषेषूर्ध्वेष्वयं क्रमात् ॥ १७ ॥
अष्टदिक्सूर्यभागैश्च त्रिखण्डा त्रि(तृ?)तीया भवेत् ।
अनेन क्रमयोगेन कोष्ठानङ्कैः प्रपूरयेत् ॥ १८ ॥
रेखाणां जायते संख्या षट्पञ्चाशच्छतद्वयम् ।
दैर्घ्ये भवति यावत्यः कला(:?) स्कन्धेऽपि तत्समाः ॥१९॥

1. 'चोरु-' । 2. 'गं' । 3. 'शिखरोदर'मिति स्यात् ? 4. 'उदये' । 5. एकस्मिन् पुस्तके एतत् पादद्वयं नास्ति । 6. '-धावष्ट-' । 7. 'द्रकला:'(?) । 8. 'एके' । 9. 'चक्रो' । 10. '-शार-' । 11. 'त्रिषष्ठात्' । 12. 'तु' ।

"Aho Shrut Gyanam"

[1]सव्यासं शिखरं कार्यं सकर्णं शिखि(ख?)रोदयम् ।
व्यासस्य कर्णयोर्मध्ये रेखाः स्युः पञ्चविंशतिः ॥ २० ॥
विंशद्भिर्विभजेद् भागैः [2]शिलान्तः फलाशान्तकम् ।
मण्डोवरोऽष्टसार्धाष्टनवांशै(ः?)[3]शिखरोदयम् ॥ २१ ॥
रेखामूलस्य विस्तारे पद्मकोशं समालिखेत् ।
चतुर्गुणेन सूत्रेण सपादः शिखरो[4]दयः ॥ २२ ॥
स्कन्धकोशान्तरे सप्त भक्ते ग्रीवा तु भारतः ।
सार्धमामलसारश्च पद्मपत्रन्तु सार्धकम् ॥ २३ ॥

[ कलशप्रमाणम् ]

त्रिभाग उच्चकलशो द्विभागं तस्य विसरम(?) ।
प्रासादस्याष्टमांशेन [5]पृथुत्वं कलशान्त[6]कम् ॥ २४ ॥
[7]च्छाद्यंतः स्कन्धपर्यन्तं एकविंशतिभाजिते ।
अङ्क-दिक्-रुद्रसूर्यांशैर्विश्वांशैस्तस्य [8]चोच्छ्रयः ॥ २५ ॥
शुकनासस्य संस्थानं च्छाद्योर्ध्वं पञ्चधा मतम् ।
एक-त्रि-पञ्च-सप्ताङ्कसिंहस्थानानि कल्पयेत् ॥ २६ ॥
द्वारस्य दक्षिणे वामे कपिलि(ः?) षड्विधा मता ।
तदूर्ध्वं शुकनासा [9]स्यात् सैव प्रासादनासिका ॥ २७ ॥
प्रासादो दशभागश्च द्वित्रिवेदांशसम्मिताः ।
प्रासादेनार्धपादेन त्रिभागेनाथ निर्मिता ॥ २८ ॥
शृङ्गोरुशृङ्गप्रत्यङ्गैः खण्डकात् गणयेत् सुधीः ।
[10]तवङ्गं [11]तिलकं कर्णं कुर्यात् प्रासादभूषणम् ॥ २९ ॥

---

1. श्लोकोयमेकत्र पुस्तके न दृश्यते । 2. 'शिलातः कलशान्तक'मिति स्यात् ।
3. 'शिंखि-' । 4. '-दयं' । 5. 'पृथुत्व-' । 6. 'के' । 7. 'च्छांद्यंतः' । 'छाद्यतः' इति स्यात् ।
8. 'चोच्छूयः' । 9. 'स्याच्छैवे' । 10. 'लवङ्ग'मिति स्यात् ? 11. '-कं' सूर्यांशं शिखरं कुर्यात्' ।

दशांशे शिखरे मूले अग्र(?)तत्व नवां[1]शकैः।
सार्धांशकौ रथौ कोणौ द्वौ शेषं [2]भद्रमिष्यते ॥ ३० ॥
रथयोरुभयोर्मध्ये वृत्तमामलसारकम्।
उत्सेधो विस्तरार्धेन चतुर्भागैर्विभाजयेत् ॥ ३१ ॥
ग्रीवा [3]चामलसारश्च पादोनश्च सपादकम्।
चन्द्रिकाभागमानेन भागेनामलसारिका ॥ ३२ ॥
घृतपात्रं न्या(न्य?)सेन्मध्ये ताम्रपात्रं सुवर्णजम्।
सौवर्णं पुरुषं तत्र तुलीपर्यङ्कशायिनम् ॥ ३३ ॥
प्रमाणं पुरुषं [4]सार्धाङ्गुलं कुर्यात् करं प्रति।
त्रिपताकं करे वामे हृदिस्थं दक्षिणं करम् ॥ ३४ ॥
प्रासादपृष्ठदेशे तु दक्षिणे प्रतिरथके।
ध्वजाधारस्तु कर्तव्य ईशान्ये नैरृतेऽथवा ॥ ३५ ॥

इति प्रासादस्योर्द्धलक्षणम् ॥ श्रीः ॥

क्षीराणवसमुत्पन्नं प्रासादस्याग्र[5]जातकम्।
माङ्गल्येषु च सर्वेषु कलशं स्थापयेद्बुधः ॥ ३६ ॥
पूर्वोक्तमानतो ज्येष्ठः षोडशांशाधिको भवेत्।
ग्रीवापीठं भवेद्भागं[6] त्रिभागेनाण्डकं तथा ॥ ३७ ॥
कर्णिकाभागतुल्ये च त्रिभागं बीजपूरकम्।
एकांशमग्रे द्वौ मूले वह्निवेदांश[7]कर्णिका।
ग्रीवा द्वौ पीठमर्धं द्वौ षड्भागं विस्तराण्डकम् ॥ ३८ ॥

इति कलशः।

[8]दण्डः सूत्रीतीयांशेन शिलांतः कलशान्तकम्।
मध्येऽष्टांशेन हीनोऽसौ ज्येष्ठपादोन्यकन्यसः ॥ ३९ ॥

1. 'शके'। 2. 'भद्रमश्नुते'। 3. 'यामल्ल'। 4. 'सार्द्धंगुलं'। 5. '-जांतकं'। 6. '-गं'। 7. 'कर्णिके'। 8. 'दण्डसूत्रीति-'। 'दण्डः स्यात्रितयांशेन शिलान्तः कलशान्तकम्। मध्योऽष्टांशेन हीनोऽसौ ज्येष्ठपादोनकन्यसः इति स्यात्।

"Aho Shrut Gyanam"

[ अथ दण्डप्रमाणभेदे मतान्तरम् ]

प्रासादपृथुमानेन दण्डो ज्येष्ठः प्रकीर्तितः ।
मध्ये(ध्यो?) हीनो दशांशेन पञ्चमांशेन कन्यसः ॥ ४० ॥
एकहस्ते तु प्रासादे दण्डः पादोनमङ्गुलम् ।
कुर्यादर्धाङ्गुला[1] वृद्धिर्यावत् पञ्चदशाहतम् ॥ ४१ ॥

[ दण्डप्रकारः ]

[2]सुवृत्तः सारदारुश्च ग्रन्थिकण्टकवर्जितः ।
पर्वभि[3]र्विषमैः कार्यः समग्रन्थि (:?) सुखावहः ॥ ४२ ॥
दण्डदीर्घषडंशेन [4]मर्कप्यर्धेन(?)विस्तरः ।
अर्धचन्द्राकृतिः पार्श्वे घण्टे द्वे कलशस्तथा ॥ ४३ ॥
ध्वजो दण्डप्रमाणेन दैर्घ्येऽष्टांशेन विस्तरे ।
नानावस्त्रविचित्राणि(?) त्रिपञ्चाग्रशिखोपमा ॥ ४४ ॥
[5]पुरे च नगरे कोटे रथे राजगृहे तथा ।
वापीकूपतड़ागेषु ध्वजाः कार्याः सुशोभनाः ॥ ४५ ॥

[ ध्वजारोपणविलम्बे दोषः ]

[6]निष्पन्नं शिखरं दृष्ट्वा ध्वजहीनं न कारयेत् ।
असुरा वासमिच्छन्ति ध्वजहीने सुरालये ॥ ४६ ॥
ध्वजोच्छ्रायेण तुष्यन्ति देवाश्च पितरस्तथा ।
दशाश्वमेधिकं पुणं(ण्यं)सर्वतीर्थधरादिकम् ॥ ४७ ॥
पञ्चाशत् पूर्वतः पश्चादात्मानं च तथाधिकम् ।
शतमेकोत्तरं सोऽपि तारयेन्नरकार्णवात् ॥ ४८ ॥

इति ध्वजलक्षणं पुण्याधिकारः ॥

इति श्री(सूत्रधारमण्डनविरचिते प्रासादमण्डने वास्तुशास्त्रे ?)प्रतिमादृष्टिपदस्थान-शिखरध्वजकलशलक्षणाधिकारश्चतुर्थोऽध्यायः ॥ ४ ॥ श्रीः ॥

1. '-र्द्ध' । 2. 'सुव्रतः' । 3. 'विषमः' । 4. 'मर्कंभर्धेन'(?) । 5. 'परे' । 6. 'निष्पन्नं' ।

"Aho Shrut Gyanam"

# पञ्चमोऽध्यायः

नानाविधमिदं विश्वं विचित्रं येन सूत्रा(त्रि?)तम् ।
सूत्रधारः स एव स्यात् सर्वेषां पालनक्षमः ॥ १ ॥

[ ग्रन्थस्य मान्यतायाचनम् ]

न्यूनाधिकं प्रसिद्धं च यत्किञ्चिन्मण्डनोदितम् ।
विश्वकर्मप्रसादेन शिल्पिभिर्मान्यतां वचः ॥ २ ॥
चतुर्भागं समारभ्य यावत् सूर्योत्तरं शतम् ।
[1]भागसंख्येति [2]विख्याता फालना कर्णबाह्यतः ॥ ३ ॥
अष्टोत्तरशतं भेदा अंशवृद्धया भवन्ति ते ।
समांशैर्विश(ष?)मं कार्यानन्तभेदैश्च फालना ॥ ४ ॥
एकस्यापि तलस्योर्द्ध्वे शिखराणि बहून्यपि ।
नामानि जातयस्तेषां मूर्द्धभागानुसारतः ॥ ५ ॥
दशहस्तादधो नास्ति प्रासादो भ्रमसंयुतः ।
नवाष्टदशभागेन [3]भ्रमो भित्तिर्विधीयते ॥ ६ ॥

[ ब्रह्मणो मन्दिरमधिकृत्य विश्वकर्म्मंमतम् ]

वैराज्यचतुरस्रस्तु चतुर्द्वारचतुष्किका ।
प्रसादो ब्रह्मणः [4]प्रोक्तो धीमता विश्वकर्मणा ॥ ७ ॥
सपादं शिखरं कार्यं घण्टाकलशभूषितम् ।
चतुर्भिः शुकनासैस्तु[5] सिंहकर्णैर्विराजितम् ॥ ८ ॥

[ एकद्वारादौ दिङ्नियमः ]

एकद्वारं भवेत् पूर्वं द्विद्वारं पूर्वपश्चिमम् ।
त्रिद्वारे [6]मध्यजं द्वारं दक्षिणास्यं विवर्जयेत् ॥ ९ ॥

---

1. 'भोग-' । 2. 'विख्यातं' । 3. 'भ्रमो' । 4. 'प्रोक्ता' । 5. '-स्तू' । 6. 'मध्यजद्वारं' ।

"Aho Shrut Gyanam"

चतुर्द्वारं चतुर्दिक्षु शिवब्रह्मजिनालये।
होमशाला चतुर्द्वारा कश्चित् राज[1]गृहे तथा ॥ १० ॥
वैराज्यादिसमुत्पन्ना(ः?)प्रासादा [2]ब्राह्मणार्चिता(ः?)।
एकत्रिपञ्चसप्ताङ्क[3]शाखांतैः पञ्चविंशतिः ॥ ११ ॥
चतुर्भक्ते भवेत् कोणो भोगो भद्रं द्विभागिकम्।
भागार्धं निर्गमं भद्रे प्रकुर्यान्मुखभद्रकम् ॥ १२ ॥
शृङ्गमेकं भवेत् कर्णे द्वे द्वे भद्रे च नन्दनम्।

इति नन्दनम्।

तथाचोक्तं—

मुखभद्रे[4] प्रतिभद्रमुद्गमो [5]रथिकोपरि।
कर्णशृङ्गे सिंहकर्णे[6] सिंहनामा स उच्यते ॥ १३ ॥
देवानान्तु प्रकर्त्तव्यं सिंहस्तत्रैव शाश्वतः।
तुष्यन्तु गिरिजा[7]तुष्यं(?)सौभाग्यधनपुत्रकैः ॥ १४ ॥
रथिका सिंह[8]कर्णे च भद्रे शृङ्गे च सिंहकः।

इति सिंहः ॥ ० ॥

[9]कर्णे(र्ण-?) शृङ्गन्तु पञ्चाण्डकश्रीनन्दन उच्यते।
त्र्यङ्गा इति च षड्भागैश्चतुरस्रं विभाजयेत् ॥ १५ ॥
कर्णं प्रतिरथं कुर्यात् भद्रार्धं भागभागिकम्।
[10]समनिर्गममस्माच्च भद्रं भागार्धनिर्गमः ॥ १६ ॥
द्वे द्वे कर्णे तथा भद्रे चैकं च प्रतिरथकम्।
[11]मन्दिरं तृतीयं भद्रं मलयोर्भद्रजं त्यजेत् ॥ १७ ॥

1. 'ग्रहे'। 2. 'ब्रह्मणार्च्चितं'। 3. 'शाखातैः। 4. 'भेद्रे'(?)। 5. 'रथिको'-।
6. -कर्णं। 7. 'तुस्य'(?)। 8. '-कर्नं'। 9.'कर्णेतुगतु' (?)। 10. 'यस्माच्च'।
11. 'मंदरं'।



"Aho Shrut Gyanam"

प्रत्येकं तिलकं कुर्यात् प्रतिरथे [1]विमानकः ।
भद्रोरुशृङ्गवैशालप्रतिरथे सुभूषणः ॥ १८ ॥

इति पञ्चाङ्गाः पञ्च ।

चतुरस्रेऽष्टभिर्भक्ते कर्णे प्रतिरथं रथम् ।
भद्रार्धभागभागश्च भागार्धेन विनिर्गमम् ॥ १९ ॥
वारिमार्गान्तरयुता रथाश्च तुल्यनिर्गमाः[2] ।
शृङ्गयुग्मश्च तिलकं कर्णे तु प्रतिरथकः ॥ २० ॥
त्वेकश्चोपरथे भद्रे त्रीणि [3]त्रि-त्रि-चतुर्दशः(?) ।
शिखरं पञ्चविस्तारं महेन्द्रो राज्यदो नृणाम् ॥ २१ ॥
कर्णे शृङ्गत्रयं शेषं पूर्ववद्रत्नशीर्षकम् ।
त्यक्त्वैकशृङ्गभद्रस्य मत्ता[4]लम्बन्तु कारयेत् ॥ २२ ॥
मस्तके तस्य छाद्यस्य शृङ्गयुग्मं प्रदापयेत् ।
सितशृङ्गस्तदा नाम ईश्वरस्य सदा प्रियः ॥ २३ ॥
तिलकं चोपरथेषु[5] भूधरो नाम नामतः ।
छाद्यशृङ्गे तु तिलकं नाम्ना भुवनमण्डनः ॥ २४ ॥
[6]शृङ्गद्वयं चोपरथे तिलकं कारयेत् सुधीः ।
त्रैलोक्यविजयो भद्रं शृङ्गेण क्षितिवल्लभः ॥ २५ ॥

इति [7]समाङ्गः ।

[8]दशभागकृते क्षेत्रे [9]भद्रार्धभागमानतः ।
त्रयं प्रतिरथाकर्णे(?)भागभागसमो भवेत् ॥ २६ ॥

---

1. '-तिमानकः' । 2. '-मः' । 3. 'त्रीत्री' । 4. '-लं च तु' । उत्तरत्रानेकधा 'मतालम्ब'शब्दप्रयोगो द्रष्टव्यः । 5. '-रथै तु' । 6. 'श्लोकोऽयमेकस्मिन् पुस्तके नास्ति । 7. 'संसांगाः'(?) । 8. 'सप्तदश' । 9. 'भद्रार्धं' ।

"Aho Shrut Gyanam"

कर्णे प्रतिरथे भद्रे द्वे द्वे शृङ्गे प्रकारयेत् ।
[1]रथोपरथे तिलकं प्रत्यङ्गञ्च रथोपरि ॥ २७ ॥
[2]मतालम्बयुतं भद्रं प्रासादोऽयं महीधरः ।
भद्रे शृङ्गं तृतीयञ्च कैलाशो नाम नामतः ॥ २८ ॥
भद्रं त्यक्त्वा रथे शृङ्गं नवमङ्गल उच्यते ।
[3]तथा भद्रे पुनर्दद्यात् तदासौ गन्धमादनः ॥ २९ ॥
[4]भद्रं त्यक्त्वा चोपरथे [5]शृङ्गः सर्वसुगन्धरः ।
भद्रे दद्यात् पुनः शृङ्गं विजयानन्द उच्यते ॥ ३० ॥
मतालम्बयुतं भद्रं उरःशृङ्गं परित्यजेत् ।
शृङ्गद्वयञ्च [6]छाद्योर्ध्वे सर्वांग(?)तिलकस्तदा ॥ ३१ ॥
उरुशृङ्गन्ततो [7]दद्यान्मतालम्बसमन्वितम् ।
महाभागस्तदा नाम सर्वकामफलप्रदा[8](दः?) ॥ ३२ ॥
कर्णे प्रतिरथे[9]रथें(?)[10]चैकन्तूपरथादिषु ।
मेरुष्वपि समाख्यातः सर्वदे[वे?]षु पूजितः ॥ ३३ ॥
प्रदक्षिणात्रये [11]स्वर्णमेरौ पुंसाञ्च यत् फलम् ।
इष्टकाशैलजे मेरु[रौ?]तत् फलं प्रदक्षि[12]णीकृते ॥ ३४ ॥
*वैराजाः प्रमुखा [13]येऽत्र नागरा ब्रह्मणोदिताः ।
वल्लभाः सर्वदेवानां शिवस्यापि विशेषतः ॥ ३५ ॥

इति श्री० [ सूत्रधारमण्डनविरचिते प्रासादमण्डने वास्तुशास्त्रे(?) ] वैराज्यादिप्रासाद-पञ्चविंशत्यधिकारे पञ्चमोऽध्यायः ॥ ५ ॥ ० ॥ श्रीः ॥

---

1. 'रथप-' । 2. 'मतात्यंच'(?) । 3. 'तथाद्युपुन' । 4. 'भद्रे त्यक्त्वां'(?) । 5. 'शृङ्गं सर्वा सु-' । 6. 'छाद्योर्द्ध'- । 7. 'नद्यान्म-' । 8. '-प्रदाः' । 9. 'रथे' । 10. 'चैकं तु परथादिषु' । 11. 'स्वर्ण' । 12. 'णी' नास्ति क्वचित् पुस्तके । 13. 'यत्र' ।
* "वैराजप्रमुखाः"—इति स्यात् ।

"Aho Shrut Gyanam"

# षष्ठोऽध्यायः

[ केसर्यादयः पञ्चविंशतिः प्रासादाः ]

केसरी सर्वतोभद्रो नन्दनो नन्दशालकः ।
[1]नन्दीशो मन्दरश्चैव श्रीवृत्तश्चामृतोद्भवः ॥ १ ॥
[2]हिमवान् हेमकूटश्च कैलाशः पृथिवीजयः ।
इन्द्रनीलो महानीलो भूधरो रत्नकूटकः ॥ २ ॥
वैदूर्यः पद्मरागश्च वज्रको मुकुटोज्ज्वलः ।
ऐरावतो राजहंसो गरुडो वृषभध्वजः ॥ ३ ॥
[3]मेरुः प्रासादराजश्च देवानामालयो हि सः ।
ब्रह्मविष्णुशिवार्काणामन्येषां न कदाचन ॥ ४ ॥
आद्यः पञ्चाण्डको देयः केसरी नाम नामतः ।
चतुर्णां क्रमतो वृद्धिर्यावदेकोत्तरं शतम् ॥ ५ ॥
क्षेत्रेऽष्टांशे [4]विभक्ते तु कर्णं भागद्वयं भवेत् ।
भद्रार्धकर्णतुल्यश्च भागेनैकेन निर्गमः ॥ ६ ॥
दशांशे[4] सार्धभागञ्च [5]भद्रार्धञ्च प्रतीरथे ।
[6]कर्णो द्विभागः सूर्यांशे भद्रार्धं प्रतिरथके ॥ ७ ॥
चतुर्दशविभक्ते [7]तु कर्णाद्यं द्वादशांशवत् ।
भद्रपार्श्वद्वये कार्या भागभागेन नन्दिका ॥ ८ ॥

---

1. 'नन्दिशो' 'मन्दिरश्चैव' । 2. 'हेमवान्' । 3. 'मेरुः प्रसाद'- । 4. 'विभक्ते तु' इत्यारभ्य 'दशांशे' इत्यन्तं यावत् एकस्मिन् पुस्तके नास्ति । 5. 'भद्रार्धं च प्रतिक्रमात् रथे' । 6. कर्णं । 7. 'तू' ।

"Aho Shrut Gyanam"

षोड़शांशे प्रकर्त्तव्यः कर्णप्रति[1]रथेऽन्तरे।
कोणिका भागतुल्या च शेषं चतुर्दशांशवत् ॥ ९ ॥
चतु[2]रस्त्रीकृते क्षेत्रे विंशत्यंश[3]विवर्जिते।
[4]कर्णो द्विभागः कोणी च सार्धांशा पृथुविस्तरैः ॥ १० ॥
द्विभागस्तु प्रतिरथो नन्दिका सार्धभागिनः[5]।
भद्र[6]नन्दा भवेद्भागा भद्रार्धं युग्मभागिकम् ॥ ११ ॥
*द्वाविंशशत्यके(?)नन्दी भागैका भद्रपार्श्वयोः।
त्रयः प्रतिरथा(ः?)कर्णं भद्रार्धञ्च द्विभागिकम् ॥ १२ ॥
एकद्वित्रित्रिकं त्रीणि वेदाश्चत्वारि पञ्च च।
तलेषु क्रमतोऽष्टासु केऽप्याहुः शिखराणि [7]हि ॥ १३ ॥
अष्टादशांशभद्रस्य पार्श्वे द्वे द्वे च नन्दिके।
कर्त्तव्ये भागभागैश्च शेषं स्यात् षोड़शांशवत् ॥ १४ ॥
शिखरं [8]त्वेक-वेदैक-षट्-त्रि-वेद-युगद्वयम्।
तलेषु क्रमतः प्रोक्ता मूलसूत्रे पराजिते ॥ १५ ॥
तलेष्वष्टासु विहिताः [9]प्रासादाः पञ्चविंशतिः।
त्रय[10]स्त्रयः क्रमेणैव चत्वारश्चाष्टमे तले ॥ १६ ॥
त्रीणि त्रीणि [11]स्वकीयांति(यानि?) द्वे द्वे परः परस्य च।
शिखराणि विधेयानि विश्वकर्मवचो यथा ॥ १७ ॥
[12]दित्र्यैकषट्त्रयोष्टादितलेषु पञ्चसु क्रमात्।
सप्तैव सप्तमे षष्ठे शिरांसि त्रीणि चाष्टमे ॥ १८ ॥

1. 'रथेतरे'। 2. '-रस्त्रि-'। 3. 'विभाजयेत्'। 4. 'कर्णे'। 5. 'भागिनं' 6. 'नंदी'। 7. 'ही'। 8. 'त्वैकवैदैक'। 9. 'प्रसादाः। 10. '-स्त्रैयः' 11. 'स्वकीयांती'। * 'द्वाविंशत्यंशके'—इति स्यात्। 12. 'द्विर्त्र्येक'-इति स्यात्।

"Aho Shrut Gyanam"

भेदाः पञ्चाशदेकैक(कं?) प्रोक्ता(ः?) श्रीविश्वकर्मणा ।
तेनैकस्मिंस्तलेऽपि स्युः शिखराणि बहून्यपि ॥ १९ ॥
रथिका सिंहकर्णञ्च भद्रे [1]कुर्याद् गवाक्षकान् ।
[2]प्रत्यङ्गैः तिलकाढ्यैश्च शोभितं सुरमन्दिरम् ॥ २० ॥
प्रासादाः [3]केसरिमुखाः सर्वदेवेषु पूजिताः ।
पुरराज्ञो(ः?) प्रजादीनां कर्त्तुः कल्याणकारकाः[4] ॥ २१ ॥

इति केसर्यादिप्रासादाः पञ्चविंशतिः ॥ श्रीः ॥

षट्त्रिंशत्करतोऽधस्ताद्यावद्धस्तचतुष्टयम् ।
*विना श्रमैर्निराधाराः कर्त्तव्याः शान्तिमिच्छता ॥२२॥

[ पञ्चविधक्षेत्राणि ]

वास्तोः पञ्चविधं क्षेत्रं चतुरस्रमथायतम् ।
वृत्तं वृत्तायतञ्चैवाष्टास्रं देवालयादिषु ॥ २३ ॥
विस्तारे तु चतुर्भागमायामे पञ्चभागिकम् ।
ऊर्ध्वं त्रिकलशान् कुर्यात् पृष्ठाग्रे सिंहकर्णकम् ॥ २४ ॥
वृत्तायतं प्रकर्त्तव्यं [5]व्यासार्धं वामदक्षिणे ।
कर्णये(?)श्रामते वृत्तं वृत्ते भद्राणि चाष्ट हि[6] ॥ २५ ॥
प्रासादो वर्त्तुलाष्टास्रः प्रायेणैकाण्डकः शुभः ।
कर्णे वा श्रोण इंड़ानां(?)मण्डपं तत्स्वरूपकम् ॥ २६ ॥

इति पञ्च क्षेत्राणि ।

विचित्रै रूपसङ्घातैर्भद्रैर्गवाक्षभूषितैः ।
वितानफालनाश्रृङ्गैरनेकैर्नागरा मताः ॥ २७ ॥

---

1. 'भद्र' । 2. 'प्रत्यंगैस्तिलकाढ्यैश्च'(?) । 3. 'केसरी' । 4. '-कारकः ।
5. 'व्यासार्द्धं' । 6. 'ही' । * 'विना श्रमै'रिति स्यात् ।

"Aho Shrut Gyanam"

पीठोपरि भवेद् वेदी पीठानि त्रीणि पञ्च च।
पीठतो द्राविडे रेखा लताशृङ्गादिसंयुता ॥ २८ ॥
भूमिका परिभूमिश्च ह्रस्वावर्कनवान्तकम्।
विभक्तिदलसंयुक्ता मूर्ध्नि शृङ्गेण भूमिजा(:?) ॥ २९ ॥
*शृङ्गेलेकेन लतिना(:?) श्रीवत्सा वारिसंयुता(:?)।
नागरा भ्रमसंयुक्ताः साधारास्ते प्रकीर्त्तिता(:?) ॥ ३० ॥
इति प्रासादानां जातयः।
पञ्चहस्तो भवेन्मेरुरेकोत्तरशताण्डकः[1]।
भेदाः पञ्चोनपञ्चाशत् करवृद्ध्या भवन्ति ते ॥ ३१ ॥
हस्ते हस्ते भवेद् वृद्धि[2]र्ह्यण्डकानाञ्च विंशतिः।
एकोत्तरसहस्रं स्यात् शृङ्गा[णा]ञ्च शतार्द्धके ॥ ३२ ॥
केसरी(रि?)प्रमुखाः कर्णे विमानञ्चोरुशृङ्गकम्।
तथैव मूलशिखरं पञ्चभूमिविमानकम् ॥ ३३ ॥
विमानं(न-?)[3]नागरं जातिस्तदा प्राज्ञैरुदाहृता।
एकशृङ्गेषु शृङ्गाणि सम्भवन्ति बहून्यपि ॥ ३४ ॥
श्रीमेरुरष्टभाग(:?) स्यादेकोत्तरशताण्डकः।
हिमशीर्षे दिशांश(:?)स्यात् युगशार्ध(?)शताण्डके ॥ ३५ ॥
भागैर्द्वादशभिर्युक्तः सार्धद्विशतसंयुतः।
सुरवल्लभनामा तं(?)प्रोक्तं श्रीविश्वकर्मणा ॥ ३६ ॥
कोणे(णो?) द्विभाग एकांशा कोणी सार्धप्रतीरथः।
अर्धांशा नन्दिका भद्रमर्धभागेन संयुतम् ॥ ३७ ॥
त्रिशतं पञ्चसप्तत्याधिकं यस्याण्डकानि हि।
भक्तश्चतुर्दशांशैस्तु नाम्ना भुवनमण्डनः ॥ ३८ ॥

1. '-का'। 2. 'र्ह्यहकाना-'। 3. 'नागरा जाती तदा'। * 'शृङ्गेणैकेन'—इति स्यात्।

"Aho Shrut Gyanam"

कोण[ः?]कोणी प्रतिरथो नन्दी भद्रार्द्धमेव च ।
द्वेचकद्वन्दांशैः साधांशैश्चतुर्दशविभाजिते ॥ ३९ ॥
बाणैकवेदयुग्मांशा वेदाः कर्णादिभागतः ।
रत्नशीर्षो भवेन्मेरुः पञ्चशतैकशृङ्गकैः ॥ ४० ॥
गुणैकयुग्मचन्द्राद्यौ(?)पुराणां विंशभाजिते ।
किरणोद्भवमेरुश्च सपादषट्शताण्डकः ॥ ४१ ॥
राम-चन्द्र-द्वियुग्मांशैः नेत्रैर्विंशतिभाजिते ।
नाम्ना कमलहंस(ः?)स्यात् सार्धसप्तशताण्डकः ॥ ४२ ॥
भागैकनिर्गमा भित्तिर्वेदसार्द्धत्रिसार्धकैः ।
द्वाभ्यां वै स्वर्णकेतुश्च पञ्चसप्ताष्टशृङ्गकैः ॥ ४३ ॥
संभ्रमो भ्रमहीनश्च महामेरुर्भ्रमद्वयम् ।
साधारेषु प्रकर्त्तव्यं भद्रे भद्राविलोकनम् ॥ ४४ ॥
वेदैक-राम-युग्मांशे नेत्रे जनविभाजिते ।
वृषभध्वजमेरुश्च सैकाण्डकसहस्रवान् ॥ ४५ ॥
संभ्रमो भ्रमहीनश्च महामेरुर्भ्रमद्वयम् ।
साधारेषु प्रकर्त्तव्यं भद्रे भद्राविलोकनम् ॥ ४६ ॥
वेदैकरामयुग्मांशे नेत्रे जनविभाजिते ।
वृषभध्वजमेरुश्च सैकाण्डकसहस्रवान् ॥ ४७ ॥
संभ्रमो भ्रमहीनश्च महामेरुर्भ्रमद्वयम् ।
साधारेषु प्रकर्त्तव्यं भद्रे भद्राविलोकनम्* ॥ ४८ ॥
राज्ञश्च प्रथमो मेरुस्ततो हीनोऽन्यवर्णज[ः] ।
विना राज्ञोऽन्यवर्णेन कृतो मेरुर्महाभयम् ॥ ४९ ॥

इति नवमेरुलक्षणम् ।

इति श्रीसूत्रधार [मण्डनविरचिते प्रासादमण्डने वास्तुशास्त्रे ?] केसर्यादिप्रासादजाति-लक्षणं पञ्चचत्वारिंशन्मेरुलक्षणं षष्ठोऽध्यायः ॥ ६ ॥ श्रीः ॥

* ४४शश्लोकस्य त्रिः ४५शश्लोकस्य च द्विः पाठो दृश्यते । तत्राभिप्रायश्चिन्त्यः ।

"Aho Shrut Gyanam"

# सप्तमोऽध्यायः

रत्नगर्भाकर्णं(?)सूर्यचन्द्रताराविताननकम् ।
विचित्रमण्डपं येन कृतं तस्मै नमः सदा ॥ १ ॥

[ मन्दिराग्रे मण्डपविधिः ]

कर्णगूढो विलोक्य[?]स्यादेकत्रिद्वारसंयुताः ।
प्रासादाग्रे प्रकर्त्तव्याः सर्वदेवेषु मण्डपाः ॥ २ ॥

[ जिनमण्डपे विशेषः ]

गूढस्त्रीकथिता नृत्यक्रमेण मण्डपास्त्रयः ।
जिनस्याग्रे प्रकर्त्तव्याः सर्वेषान्तु बलाणकम् ॥ ३ ॥

[ पञ्चविधमण्डपकथनम् ]

समं सपादं प्रासादं[ः]सार्धपादो नतद्वयम् ।
द्विगुणं वा प्रकर्त्तव्या मण्डपाः पञ्चधा मताः ॥ ४ ॥

[ मण्डपमानकथनम् ]

समं सपादः पञ्चाशत्पर्यन्त-दशहस्तकम् ।
दशान्तं पञ्चतः सार्धं द्विपादोनं चतुःकरे ॥ ५ ॥
त्रिहस्ते द्विगुणं द्व्येकहस्ते कुर्यात् चतुष्किकाम् ।
प्रायेण मण्डपं सार्धं द्विगुणं प्रत्यलिन्दकैः ॥ ६ ॥

---

* समरपरिस्थितौ 'एसियाटिक सोसाइटी'स्थप्राचीनग्रन्थानां संरक्षणार्थं स्थानान्तरे अपसारणात् अतःपरं पाठान्तरसंकलनाप्रयासो नावन्ध्यतां धत्ते ।



"Aho Shrut Gyanam"

[ घण्टामानम् ]

मण्डपे स्तम्भपट्टार्थं मध्यपट्टानुसारतः।
शुकनासासमा घण्टा नू[न्यू?]ना श्रेष्ठा न चाधिका ॥ ७ ॥
मुखमण्डपसङ्घातैर्यदा भित्य[त्त्य?]न्तरे भवेत्।
न दोष[ः]स्तम्भपट्टाद्यैः समं वा विषमं तलम् ॥ ८ ॥
नवाष्ट-दशभागेषु त्रिभिश्चन्द्रावलोकनम्।
हस्तकं अंगुलोनं वा तदूर्ध्वं मत्तवारणम् ॥ ९ ॥
सार्धपञ्चांशकैर्भक्तैः सपादं राजसेनकम्।
सापादं[?]त्र्यंशको वेदिर्भागेनासनपेटकम् ॥ १० ॥
तदूर्ध्वं सप्तसार्धांशे यावत् पट्टस्य पेटकम्।
सोर्धं पञ्चांशकै[ः] स्तम्भः पादोनं भरणं भवेत् ॥ ११ ॥
भागार्धं भरणञ्चापि सपादं सार्धतः शरः।
पट्टो द्विभागस्तस्योर्ध्वे कर्त्तव्या[?]छाद्यकोदयः ॥ १२ ॥
त्रिभागे तलतच्छाद्यं तत्पेटं पट्टपेटकैः।
अर्धांशोर्ध्वा कपोतालिर्द्विभागे पट्टविस्तरे ॥ १३ ॥
प्रासाद-दश-रुद्राद्य-भागेन स्तम्भविस्तरः।
वेदाष्ट-रवि-विंशत्या कर्णे वृत्तस्तु पञ्चधा ॥ १४ ॥
द्वाराग्रे स्तम्भवेधाद्या प्रा(ग् ?)ग्रीवो मण्डपो भवेत्।
द्विद्विस्तम्भविवृद्धया च षोड़शा(?)च प्रकीर्त्तिता ॥ १५ ॥
भित्तिः प्रासादवद् गेहे मण्डपेऽष्टविधेषु च।
चतुरस्रशुभस्तस्य तथा प्रतिरथान्वितः ॥ १६ ॥
मुखभद्रयुतो वापि द्वित्रिप्रतिरथैर्युतः।
कर्णोदकान्तरे नाथ(रेणाथ?) भद्रोदकविभूषितः ॥ १७ ॥

"Aho Shrut Gyanam"

दलेनार्धेन पादेन दलस्य निर्गमो भवेत् ।
मूलप्रासादवद् बाह्ये पीठजङ्घादिमेखला ॥ १८ ॥
गवाक्षेणान्वितं भद्रमथ जालकसंयुतम् ।
गुहश्च कर्णगूहे[हो?] वा भद्रचन्द्रावलोकनम् ॥ १९ ॥
त्रिद्वारे चैकवक्त्रे ऽथ मुखे कार्या चतुष्किका ।
गृहे प्रकाशको वृद्धिर्मधोदयकरोटकम्(?) ॥ २० ॥

इत्यष्ट गूढमण्डपाः ॥ श्रीः ॥

[ एकचतुष्क-त्रिचतुष्कादिभेदेन मण्डपानां द्वादश भेदाः ]

एक-त्रि-वेद-सप्ताङ्क-चतुष्काश्च त्रिकत्रये ।
अर्धभद्रं विभागेन पार्श्वयोरग्रतस्तथा ॥ २१ ॥
अग्रतस्त्री(स्त्रि?)चतुष्कस्य तथा पार्श्वे(-र्श्व?)द्वयेऽपि च ।
मुक्तकोणे चतुष्के द्वे इति द्वादश मण्डपाः ॥ २२ ॥
गृहस्याग्रे प्रकर्त्तव्या तथा नाना चतुष्किका ।
चतुरस्रादिभेदेन वितानैर्बहुभिर्युता ॥ २३ ॥
त्रिकाग्रे रङ्गभूमाथ तत्र वै नृत्यमण्डपान् ।
प्रासादाग्रेऽथ सर्वत्र न प्रकुर्याद्विधानतः ॥ २४ ॥

इति द्वादश मण्डपाः ।

सप्तविंशति उक्ता[क्ता?] ये मण्डपा विश्वकर्मणा ।
तलैस्तु विषमैस्तुल्यैः क्षणैः स्तम्भैः समैस्तथा ॥ २५ ॥

[ स्तम्भसंख्याभेदेन सप्तविंशतिर्मण्डपभेदाः ]

प्रथमो द्वादशस्तम्भो द्विद्विस्तम्भो[-म्भ-?]विवर्द्धनात् ।
यावत् षष्टिच(श्च?)तुर्युक्ता सप्तविंशतिमण्डपाः ॥ २६ ॥

"Aho Shrut Gyanam"

क्षेत्रार्धस्य षड्‌ंशोना चैकास्राष्टास्रमुच्यते ।
कलास्रे क्षेत्रषड्‌ भागास्ततृषड्‌ंशेन संयुता ॥ २७ ॥
अष्टास्रं षोड़शास्रं च वृत्तं कुर्यात्तदूर्ध्वतः ।
उदयं विस्तरार्धेन तं षष्ठ्यं वांशभाजयेत्(?) ॥ २८ ॥
कर्णदर्दरिका सप्तभागेन निर्गमोच्चता ।
रूपकंठं तु पञ्चांशं द्विभागेनात्र निर्गमम् ॥ २९ ॥
विद्याधरैः समायुक्तं षोड़शाष्टदिवाकरैः ।
जिनसंख्यामितैर्वापि दंततुल्योवि[ल्यैर्वि?]राजितम् ॥ ३० ॥
विद्याधरः पृथुत्वेन सप्तांशो निर्गमोदयः ।
तदूर्ध्वे चित्ररूपाश्च नर्त्तक्यो नृत्यशोभिताः ॥ ३१ ॥
गजतालस्तु षट्‌सार्धा प्रथमा द्वितीया तु षट् ।
तृतीया सार्धपञ्चांशा कोलानि त्रीणि पञ्च च ॥ ३२ ॥
मध्ये वितानं कर्त्तव्यं चित्रवर्णविराजितम् ।
नाटकादिकथारूपैर्नानाकारैर्विराजितम् ॥ ३३ ॥
एकादशशतान्येव वितानानां त्रयोदश ।
शुद्धसंप्या(?)टमिश्राणि क्षिप्ताक्षिप्तानि यानि च ॥ ३४ ॥
विततानि विचित्राणि वस्त्रचित्रादिभेदतः ।
तानि लोके प्रवर्तन्ते तस्मादूह्यानि लोकतः ॥ ३५ ॥
मण्डपेषु च सर्वेषु पीठान्ते रंगभूमिका[म् ?] ।
कुर्यादुत्तेन[1] पटे[ट्टे ?]न चित्रपाषाणजेन च ॥ ३६ ॥

इति मण्डपाः

1. उत्तेनेनि उनत्तेः क्त-प्रत्ययेन निष्पन्नम् । आर्द्रेणेत्यर्थः ।

"Aho Shrut Gyanam"

बलाणे देवगेहाग्रे राजद्वारे गृहे तथा।
जलाशयेऽथ कर्त्तव्यं सर्वेषां मुखमण्डपम् ॥ ३७ ॥
जगतीपादविस्तीर्णं पादपादेन वर्जितम्।
शालालिन्देन गर्भेण प्रासादेन समं भवेत् ॥ ३८ ॥
उत्तमे कन्यसं मध्ये मध्यं ज्येष्ठे तु कन्यसम्।
एक-द्वि त्रि-चतुः-पञ्च-रस-सप्तपदांतरे ॥ ३९ ॥
मूलप्रासादवद्द्वारं मण्डपे च बलाणके।
न्यूनाधिकं न कर्त्तव्यं दैर्घ्ये हस्ताङ्गुलाधिकम् ॥ ४० ॥
पेटकं चोत्तराङ्गाणां सर्वेषां समसूत्रतः।
अंगणातु(?)समं पेटं जगत्याश्चान्तरा गजम् ॥ ४१ ॥
जगत्यग्रे चतुष्कीया वामनं तद्वलाणकम्।
वामेऽथ दक्षिणाद्वारा द्वौकामा(?)मत्तवारणम् ॥ ४२ ॥
ऊर्ध्वा भूमिः प्रकर्त्तव्या नृत्यमण्डपसूत्रतः।
मत्तवारणकं वेदी वितानतोरणैर्युता ॥ ४३ ॥
राजद्वारे बलाणे च पञ्च वा सप्तभूमिका।
तद्विमानं बुधैः प्रोक्तं पुष्करं वारिमध्यतः ॥ ४४ ॥
हर्म्यराजगृहे वापि कर्त्तव्यं गोपुराश्रितः।
एकभूमौ त्रिभूम्यन्तं गृहा(?)द्वारस्य मस्तके ॥ ४५ ॥

इति पञ्चविधबलाणकम्

[ संवर्णोपदेशः ]

संवर्णा च प्रकर्त्तव्या प्रथमा पञ्चघण्टिका।
चतुर्घण्टाभिवृद्ध्या च यावदेकोत्तरं शतम् ॥ ४६ ॥

"Aho Shrut Gyanam"

पञ्चविंशतिरित्युक्ता प्रथमा वसुभागिका ।
वेदोत्तरशतं यावत् वेदांशा वृद्धिरिष्यते ॥ ४७ ॥
भद्रार्धे रथिकार्धेन तवंगं(?)वामदक्षिणे ।
अर्धोदयेन रथिका घण्टाकूटं तवंगकम् ॥ ४८ ॥
कलाकूटान्वितापूर्वा पञ्चभिः कलशैर्युता ।
भागतुल्यैस्तथा सिंहैरेवमन्याश्च लक्षिताः ॥ ४९ ॥

इति मण्डपस्य ऊर्ध्वसंवर्णः ।

इति श्री ( सूत्रधारमण्डनविरचिते प्रासादमण्डने वास्तुशास्त्रे ? ) मण्डप-बलाणक-संवर्णाधिकारः सप्तमोऽध्यायः ।

"Aho Shrut Gyanam"

# अष्टमोऽध्यायः

अथ साधारणोऽध्यायः सर्वलक्षणसंयुतः ।
विश्वकर्मप्रसादेन विशेषेण प्रकथ्यते ॥ १ ॥
मानं न्यूनाधिकं वापि स्वयंभूबाणरत्नजे ।
घटितेषु विधातव्यमर्चालिंगेषु शास्त्रतः ॥ २ ॥
बहुले चाल्पलेपे वा समं संधिः शिरोगुरुः ।
सशल्यं पादहीनं तु तच्च वास्तु विनश्यति ॥ ३ ॥
अन्यवास्तूचिते द्रव्ये अन्यवस्तुनिवेशिते ।
प्रासादे न भवेत् पूजा गृहे तु न वसेत् पतिः ॥ ४ ॥
स्वस्थाने संस्थितं यच्च विप्रवास्तुशिवालयम् ।
अचाल्यं सर्वदेशेषु चालिते राष्ट्रविभ्रमः ॥ ५ ॥
वापी-कूप-तड़ागानि प्रासादभवनानि च ।
जीर्णान्युद्धरते यस्तु पुण्यमष्टगुणं लभेत् ॥ ६ ॥

[ जीर्णोद्धारविधिः ]

तद्रूपं ततप्रमाणं स्यात् पूर्वसूत्रं न चालयेत् ।
हीने तु जायते हानिरधिके तु धनक्षयः ॥ ७ ॥
वास्तुद्रव्याधिकं कुर्यात् मृतकाष्ठे शैलजेऽपि वा ।
शैलजे धातुजे चैव धातुजे रत्नजेऽथवा ॥ ८ ॥
पूर्वोत्तरदिशामूढं मूढं पश्चिमदक्षिणे ।
तत्र मूढममूढं वा यत्र तीर्थं समाहितम् ॥ ९ ॥

"Aho Shrut Gyanam"

सिद्धायतनतीर्थेषु नदीनां संगमेषु च ।
स्वयंभूबाणलिंगेषु तत्र दोषो न विद्यते ॥ १० ॥
अव्यक्तं मृन्मयं चाल्पं त्रिहस्तान्तं तु शैलजम् ।
दारुजं पुरुषार्धं च अत ऊर्ध्वं न चालयेत् ॥ ११ ॥
विषमस्थानमाश्रित्य भग्नं यत् स्थापितं सुरैः ।
तत्र स्थानस्थिता देवा भग्नाः पूजाफलप्रदाः ॥ १२ ॥
यद्यथा स्थापिता वास्तु तत्तथैव हि कारयेत् ।
अव्यक्तं चालितं नृणां दारुणं कुरुते भयम् ॥ १३ ॥
अथातश्चालतः(लितं ?)प्राज्ञो जीर्णं व्यंगं च दूषितम् ।
आचार्यैः शिल्पिभिः प्राज्ञैः शास्त्रदृष्ट्या समुद्धरेत् ॥ १४ ॥
स्वर्णजं रौप्यजं वापि कुर्यान्नागमथो वृषम् ।
तस्य शृंगेण दन्तेन पतितं पातयेत् सुधीः ॥ १५ ॥

इति जीर्णोद्धारविधिः ।

मण्डलं जातकं चैव कीलकं सुशिरस्तथा ।
छिद्रसन्धिश्च कारश्च(?)महादोषा इति स्मृताः ॥ १६ ॥
भिन्नदोषकरं यस्मात् प्रासादमठमन्दिरम् ।
मुखाभिजातके(?)द्वारे रश्मिवातप्रभेदितम् ॥ १७ ॥
ब्रह्मविष्णुशिवार्काणां भिन्नं दोषकरं नहि ।
जिनगौरीगणेशानां गृहं भिन्नं विवर्जयेत् ॥ १८ ॥
व्यक्ताव्यक्तं गृहं कुर्यात् भिन्नं भिन्ना(न्दा?)नमूर्त्तिकम् ।
अ(य?)था स्वामिशरीरं स्यात् प्रासादमपि तादृशम् ॥ १९ ॥

इति भिन्नदोषाः ।

"Aho Shrut Gyanam"

भिन्नं चतुर्विधं ज्ञेयमष्टधा मिश्रकं मतम् ।
मिश्रकं पूजितं तत्र भिन्नं वै दोषकारणम् ॥ २० ॥
छन्दभेदो न कर्त्तव्यो जातिभेदस्तथा पुनः ।
उत्पद्यते महामर्म जातिभेदे कृते सति ॥ २१ ॥
द्वारहीने हनेच्चक्षुर्नालहीने धनक्षयम् ।
अपदस्थापितस्तम्भो महारोगं विनिर्द्दिशेत् ॥ २२ ॥
स्तम्भव्यासोदये हीने कर्त्ता तत्र विनश्यति ।
प्रासादे पीठहीने तु नश्यन्ति गजवाजिनः ॥ २३ ॥
रथोपरथहीने तु*कर्त्ता तत्र विनश्यति ।
प्रासादे पीठहीने तु नश्यन्ति गजवाजिनः ॥ २४ ॥
रथोपरथहीने तु*प्रजापीड़ां विनिर्दिशेत् ।
कर्णहीने सुरागारे फलं क्वापि न विद्यते ॥ २५ ॥
जंघाहीने हरेद्बन्धुः कर्तृकान् करकादिकान् ।
शिखरे हीनमाने तु पुत्रपौत्रधनक्षयः ॥ २६ ॥
अतिदीर्घे कुलच्छेदो ह्रस्वेधिव्याधिसम्भवः ।
तस्माच्छास्त्रैस्तु मानेन सुखदं सर्वकामदम् ॥ २७ ॥
जगत्यां रोपयेत् शालां शालायां चैव मण्डपम् ।
मण्डपेन च प्रासादो ग्रस्तो वै दोषकारकः ॥ २८ ॥

इति दोषाः ।

प्रासादोच्छ्रायविस्ताराज्जगती वामदक्षिणे ।
छायाभेदेन कर्त्तव्या तथालिंगश्च(?)पिड्का ॥ २९ ॥

** तारकाचिह्नद्वयमध्यवर्त्ती ग्रन्थभागो लिपिकरप्रमादात् पूर्वलिखितांशस्यैव पुनर्लेखनमिति प्रतिभाति ।

६

"Aho Shrut Gyanam"

जगत्यां त्रिचतुःपञ्चगुणं देवपुरं त्रिधा ।
एक-द्वि-वेद-साहस्रहस्ते स्याद्राजमन्दिरम् ॥ ३० ॥
कलाष्टवेदसाहस्रे ह्रस्वे राजपुरं समम् ।
दैर्घ्यतुल्यं सपा[दा ?]र्धं(?)सार्धांशेनाधिकं शुभम् ॥ ३१ ॥
द्वादश त्रिपुराणि स्युर्देवस्थानानि चोत्तरे ।
षट्त्रिंशत् षड्विवृद्ध्या च यावदेकोत्तरं शतम् ॥ ३२ ॥
पुरं प्रासादगेहे स्यात् सौधैर्जालगवाक्षकैः ।
कीर्त्तिस्तम्भैर्जलारामैर्गेहैर्भाण्डैः सुशोभितम् ॥ ३३ ॥

इति देवपुर-राजपुराणि ।

प्रासादस्योत्तरे याम्ये तथाग्नौ पश्चिमेऽपि च ।
यदि नामाश्रमं कुर्यात् सततं द्वित्रिभूमिकाम् ॥ ३४ ॥
द्विशाला मध्यषड्दारुपट्टा शालाग्रशोभितम् ।
मत्तवारणमग्रे च तदूर्ध्वं पट्टभूमिषु ॥ ३५ ॥
कोष्ठागारं च वायव्ये वह्निभागे महानसम् ।
पुण्यगेहं तथेशाने नैर्ऋत्ये पात्रमायुधम् ॥ ३६ ॥
छात्रागारं च पुरतो वारुण्यां च जलाश्रयम् ।
मठस्योपरितः कुर्याद्विद्यावा(ख्या?)ख्यानमण्डपम् ॥ ३७ ॥

इति मठः ।

पूर्वोक्ता सत्पुण्याहप्रतिष्ठा सर्वसिद्धिदा ।
रवेः सौम्यायने कुर्याद्देवानां स्थापनादिकम् ॥ ३८ ॥
प्रतिष्ठा चोत्तरामूल आर्द्रायां च पुनर्वसौ ।
पुष्ये हस्ते मृगे स्वातीरोहिण्यां श्रुति(?)मैत्रभे ॥ ३९ ॥

"Aho Shrut Gyanam"

तिथिरिक्तां कुजं धिष्ण्यं क्रूरं विध्ययुतं तथा ।
दग्धां तिथिं च गण्डान्तं चारम्भोपगृहं त्यजेत् ॥ ४० ॥
सुदिने सुमुहूर्त्ते च लग्ने सौम्ययुतेक्षितौ(ते?) ।
अभिषेकः प्रतिष्ठा च प्रवेशादिकमुच्यते ॥ ४१ ॥

[ मण्डपस्य दिङ्निर्देशः ]

प्रासादाग्रे तथैशाने उत्तरे मण्डपं शुभम् ।
त्रि-पञ्च-सप्त-नन्दैकादशविश्वकरान्तकम् ॥ ४२ ॥
मण्डप[ः?]स्यात् करैरष्टदशसूर्यकलामितैः ।
षोडशहस्ततः कुण्डवशादधिक इष्यते ॥ ४३ ॥
स्तम्भैः षोडशभिर्युक्तं तोरणादिविराजितम् ।
मण्डपं वेदिकामध्ये पञ्चाष्टनवकुण्डकम् ॥ ४४ ॥

[ कुण्डमानम् ]

हस्तमात्रं भवेत् कुण्डं मेखलायोनिसंयुतम् ।
आगमैर्वेदमन्त्रैश्च होमं कुर्याद् विधानतः ॥ ४५ ॥
अयुते हस्तमात्रं च लक्षार्धन्तु द्विहस्तकम् ।
त्रिहस्तं लक्षहोमे तु दशलक्षे चतुःकरम् ॥ ४६ ॥
त्रिंशलक्षे पञ्चहस्तं कोट्यर्धे षट्करं मतम् ।
अशीतिलक्षेद्वि(ष्वि?)करं कोटिहोमेऽष्टहस्तकम् ॥ ४७ ॥
ग्रहपूजाविधानेन कुण्डमेककरं भवेत् ।
मेखला तृतीयं वेद-राम-युग्मा(ग्मां ?)गुलैः क्रमात् ॥ ४८ ॥
एकाद्वित्रिकरं कुर्यात् वेदिकोपरि मण्डलम् ।
ब्रह्मविष्णुरवीशानान्तु सर्वतोभद्रमिष्यते ॥ ४९ ॥

"Aho Shrut Gyanam"

भद्रं तु सर्वदेवानां नवा नाभिस्तथा लयम्।
लिङ्गोद्भवं शिवस्यापि लतालिङ्गोद्भवं तथा ॥ ५० ॥
भद्रं गौरीतिलकं च देवीनां पूजने हितम्।
अर्धचन्द्रं तडागेषु वाप्राकारं तथैव च ॥ ५१ ॥
टङ्काभं स्वस्तिकं चैव वापीकूपेषु पूजयेत्।
पीठिकाजलपीठेषु योन्याकारं तु कामदम् ॥ ५२ ॥
जगदन्तं महादुर्गे प्रशस्तं मण्डलं भवेत्।
टङ्काभं चतुरस्रं च गजदन्तमिहायतम् ॥ ५३ ॥
विख्यातं सर्वतोभद्रं ज्ञेयान्यन्यानि लोकतः।
पूर्वादितोरणं छन्न-यज्ञाङ्गं वटपिप्पलैः ॥ ५४ ॥
द्वात्रिंशत् षोड़शाष्टौ च(?)रुत्तमान् वेदपारगान्।
कुलिनोऽनङ्गसर्वज्ञान्यज्ञार्थमभिमन्त्रयेत् ॥ ५४ ॥
मण्डपस्य त्रिभागेन उत्तरे स्नानमण्डपम्।
स्थण्डिलं वालुकं कृत्वा शय्यायां स्नापयेत् सुरम् ॥ ५६ ॥
पञ्चगव्यैः कषायैश्च वल्कलैः क्षीरवृक्षजैः।
स्नापयेत् पञ्चकलशैः शतवारं जलेन च ॥ ५७ ॥
वेदमन्त्रादि-वादित्र-गीतमङ्गलनिःस्वनैः।
वस्त्रेणाच्छादयेद्देवं वेद्यां तं मण्डपं नयेत् ॥ ५८ ॥
तल्पमारोपयेद्वेद्यामुत्तराह्नि न्यसेत्ततः।
कलशं तु शिरोदेशे पादस्थाने कमण्डलुम् ॥ ५९ ॥
वज्रवैदूर्यकं मुक्तामिन्द्रनीलं सुनीलकम्।
पुष्परागं च गोमेदं चन्द्रं पूर्वादितो न्यसेत् ॥ ६० ॥

"Aho Shrut Gyanam"

व्यजनं दक्षिणे देशे दर्पणं वामतः शुभम्।
रत्नन्यासं ततः कुर्याद्दिक्पालादिकपूजनम् ॥ ६१ ॥
सुवर्णं रजतं ताम्रं कांस्यं रीतिं च सीसकम्।
बङ्गं लोहञ्च पूर्वादिसृष्ट्या धातूनिह न्यसेत् ॥ ६२ ॥
वज्रवह्निसहदेवी विष्णुक्रान्तेन्द्रवारुणी।
शङ्खिनी ज्योतिष्मती चैव स्वरिक्तानि क्रमान्न्यसेत् ॥ ६३ ॥
यवो व्रीहिस्तथा कङ्गु जुर्णाह्वा च तिलैर्युता।
शालिमुद्गा समाख्याता गोधूमाश्च क्रमेण तु ॥ ६४ ॥
यद्देवाभरणं पूजावस्त्रालङ्कारभूषणम्।
तत् सर्वं शिल्पिने देयमाचार्याय तु याज्ञिकम् ॥ ६५ ॥
ततो महोत्सवं कुर्यान्नृत्यगीतैरनेकशः।
नैवेद्यैरार्तिकं पूजामङ्गन्यासादिकं तथा ॥ ६६ ॥
क्षीरं क्षौद्रं घृतं खण्डं पक्वान्नानि बहून्यपि।
षड्रसाः स्वादुभक्ष्याणि समन्तात् परिकल्पयेत् ॥ ६७ ॥
विप्राणां सम्प्रदायाच्च वेदमन्त्रैस्तथागमैः।
सकलीकरणं देवं न्यासं कृत्वा प्रतिष्ठयेत् ॥ ६८ ॥
प्रासादे देवतान्यासं स्थावरेषु पृथक् पृथक्।
खर(स्व?)शिलायां च वाराहं पौल्यां च(?)नागकुलानि च
॥ ६९ ॥
प्रकुम्भे जलदेवांश्च पुष्पके किंसुरांस्तथा।
नन्दिनौ जाड्यकुम्भे च कणालपाल्यां(?)स्थापयेद्धरिम् ॥७०॥
गणेशं गजपीठे च अश्वपीठे तथाश्विनौ।
नरपीठे नरांश्चैव क्षमाश्च क्षुरके यजेत् ॥ ७१ ॥

"Aho Shrut Gyanam"

भद्रे सन्ध्यांतरं कुम्भे पार्वतीं कलशे स्थिताम्।
कपोताल्यां च गन्धर्वान्मञ्चिकायां सरस्वतीम्॥ ७२॥
जङ्घायां च दिशापालानिन्द्रमुद्गमसंस्थितम्।
सावित्रीं भरणे देशे शिरावट्यां च वेदिकाम्॥ ७३॥
विद्याधरान् कपोताल्यामन्तराले सुरांस्तथा।
पर्जन्यं कूटच्छाद्ये च ततो मध्ये प्रतिष्ठयेत्॥ ७४॥
शाखयोश्चन्द्रसूर्यौ च त्रिमूर्त्तिश्चोत्तराङ्गके।
उदुम्बरे स्थितं यक्षमश्विनावर्धचांद्रके॥ ७५॥
कौलिकायां धराधारं क्षितिं चोत्तानपट्टके।
स्तम्भेषु पर्वतांश्चैवमाकाशं च करोटके॥ ७६॥
मध्ये प्रतिष्ठयेद्देवं मकरे जाह्नवीं तथा।
शिखरस्योरुश्रृङ्गेषु पञ्च पञ्च प्रतिष्ठयेत्॥ ७७॥
ब्रह्मा विष्णुस्तथा रुद्र ईश्वरश्च सदाशिवः।
शिखरे चेश्वरं देवं शिखायां तु सुराधिपम्॥ ७८॥
ग्रीवायाममरं देवं मण्डपे च निशाकरम्।
पद्माक्षं पद्मपत्रं च कलशे च सदाशिवम्॥ ७९॥
सद्यो वाम अघोरस्ततपुरुष ईश एव च।
कर्णादिभद्रपर्यन्तं पञ्चाङ्गे तान् प्रतिष्ठयेत्॥ ८०॥

इति स्थावरप्रतिष्ठा।

प्रथमं देवताहष्टेर्दर्शयेदन्तपर्वतम्।
विप्रं कुमारिकां वस्तु ततो लोकान् प्रदर्शयेत्॥ ८१॥
ईज्यानन्तरतः कुर्यात् सूत्रधारस्य पूजनम्।
वस्त्रालङ्कार-भू-वित्त-गो-महिष्यश्च(श्व ?)वाहनैः॥ ८२॥

"Aho Shrut Gyanam"

अन्येषां शिल्पिनां पूजा कर्त्तव्या कर्मकारिणाम्।
स्वाधिकारानुसारेण वस्त्रताम्बूलभोजनैः ॥ ८३ ॥
काष्ठपाषाणनिर्माणकारिणो यत्र मन्दिरे।
भुञ्जते तत्र भक्तासौ शङ्करस्त्रिदशैः सह ॥ ८४ ॥
पुण्यं प्रासादजं स्वामी प्रार्थयेत् सूत्रधारतः।
सूत्रधारो वदेत् स्वामिन्नक्षयं भवतात्तव ॥ ८५ ॥

इति सूत्रधारपूजा

आचार्यपूजनं कृत्वा वस्त्रस्वर्णधनैः सह।
दानं दद्याद् द्विजातिभ्यो दीनान्धदुर्बलेषु च ॥ ८६ ॥
सर्वेषां धनमाधारः प्राणिनां जीवनं परम्।
वित्ते दत्ते प्रतुष्यन्ति मानुषाः पितरः सुराः ॥ ८७ ॥

प्रतिष्ठाविधिः।

प्रतिष्ठा वीतरागस्य जीनशासनमार्गतः।
नवकारैः सूरमन्त्रैश्च सिद्धिकेनलभाषितम् ॥ ८८ ॥
ग्रहाः सर्वज्ञदेवाश्च पादपीठे प्रतिष्ठिताः।
येनानन्तविभेदेन मुक्तिमार्ग उदाहृतः ॥ ८९ ॥
जिनानां मातरो यत्र यक्षिणी गौतमी तथा।
सिद्धाः कालत्रयो( ो ? )जाताश्चतुर्विंशतिमूर्त्तयः ॥ ९० ॥
इति स्थाप्य जिनावारे त्रिप्राकारं गृहं तथा।
सावन्तशिखिरं मन्दिरसरत्वष्टापदादिकम्(?) ॥ ९१ ॥
प्रासादो वीतरागस्य पुरमध्ये सुखावहः।
कल्याणकारि गृहस्य चतुर्दिक्षु प्रकल्पयेत् ॥ ९२ ॥

इति जिनप्रतिष्ठा।

"Aho Shrut Gyanam"

माघादिपञ्चमासेषु वापीकूपादि संस्मृतम् ।
तड़ागस्य चतुर्मासं कुर्यादाषाढ़मार्गयोः ॥ ९३ ॥
असंस्कृतं जलं देवाः पितरो न पिबन्ति ते ।
संस्कृते तृप्तिमायान्ति तस्मात् संस्कारमाचरेत् ॥ ९४ ॥
जीवनं वृत्तजन्तूनां यः करोति जलाशयम् ।
दत्ते वा स लभेत् सौख्यमुर्व्यां स्वर्गे च मानवः ॥ ९५ ॥
पुरान्धकवधे रुद्रललाटात् पतितः क्षितौ ।
स्वेदस्तस्मात् समुद्भूतं भूतमत्यन्तदुःसहम् ॥ ९६ ॥
गृहीत्वा सहसा देवैर्न्यस्तं भूमावधोमुखम् ।
जानुनी कोणयोः पादौ रक्षोदिशि शिवे शिरः ॥ ९७ ॥
चत्वारिंशद्युताः पञ्च वास्तुदेहे स्थिताः सुराः ।
देव्योष्टौ बाह्यगास्तेषां वसनाद्वास्तुरुच्यते ॥ ९८ ॥
अधोमुखेन विज्ञप्तैस्त्रिदशैर्विहितो बलिः ।
तेनैव बलिना शान्तिं कुरुते हानिमन्यथा ॥ ९९ ॥
प्रासादभवनादीनां प्रारम्भे परिवर्तने ।
वास्तुकर्मसु सर्वेषु पूजितः सौख्यदो भवेत् ॥ १०० ॥
एकपदादितो वास्तुर्यावत् पदसहस्रकम् ।
द्वात्रिंशन्मण्डलानि स्युः क्षेत्रतुल्याकृतीनि च ॥ १०१ ॥
एकाशीतिपदो वास्तुश्चतुःषष्टिपदोऽथवा ।
सर्ववास्तुविभागेषु पूजयेन्मण्डलद्वयम् ॥ १०२ ॥
ईशो मूर्धनि पर्जन्यो दक्षिणं कर्णमाश्रितः ।
जयस्कन्धे महेन्द्राद्याः पञ्चलक्षणबाहुगाः ॥ १०३ ॥

"Aho Shrut Gyanam"

[1]महेन्द्रः सूर्य-सत्यश्च भृश आकाशमेव च।
वह्निर्जानुनि पूषाद्याः सप्त पादनलीस्थिताः ॥१०४॥
पूषा च वितथश्चैव गृहत्ततयमावुभौ।
गन्धर्वो भृङ्गराजश्च मृगः सप्त सुरा इति ॥१०५॥
पादयोः पितरस्तस्मात् सप्त पादतलस्थिताः।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ॥१०६॥
असुरः शोषयक्ष्मा च रोगो जानुनि संस्थितः।
नागो मुख्यश्च भल्लाटः सोमोऽङ्गिराश्च बाहुगाः ॥१०७॥
अदितिस्त्वधदेशे(?)च वामे कर्णे दितिः स्थिता।
द्वात्रिंशद्बाह्यगा देवा नाभिपृष्ठे स्थितो विधिः ॥१०८॥
अर्यमा दक्षिणे वामे स्तने तु पृथिवीधरः।
विवस्वानथ मित्रश्च दक्षवामोरुगावुभौ ॥१०९॥
आपस्तुमलकावास्तु(?)राय(प?)वत्सो हृदि स्थितः।
सावित्र(:)सविता तद्वत् करं दक्षिणमाश्रितौ ॥११०॥
इन्द्र इन्द्रजयो मेन्द्रे(ढ्रे?) रुद्रोऽसौ वामहस्तके।
रुद्रदासोऽपि तत्रैव इति वेदमयं वपुः ॥१११॥
ईशान्ये चरकी बाह्ये पिलिपिच्छस्तु पूर्वतः।
विदारिकाग्निकोणे च विजृम्भायां दिगामिता ॥११२॥
नैर्ऋत्ये पूतना स्कन्धे पश्चिमे वायुकोणके।
पापराक्षसिका सौम्येर्यमं(यमं?) वै सर्वतोऽर्च्चयेत् ॥११३॥

---

1. "महेन्द्र-सूर्यसत्याश्च" इति पाठः साधीयान्।

"Aho Shrut Gyanam"

देवि क्रूरान्ममन्दीश्च माषान्नैः सुरयामिषैः ।
अपरान् वृकान्नैश्च(?)सर्वान् स्वर्णसुगन्धिभिः ॥११४॥

इति वास्तुपुरुषन्यासः ।

एकेन शास्त्रेण गुणाधिकेन
विना द्वितीयेन पदार्थसिद्धिः ।
तत्(तः?)प्रा(प्र?)कारान्तरतो विलोक्यं
मणी गुणाढ्योपि सहायकाङ्क्षी ॥११५॥
श्रीविश्वकर्मगणनाथमहेशचण्डी-
श्रीविश्वरूपजगदीश्वरसुप्रसादात् ।
प्रासादमण्डनमिदं रुचिरं चकार
श्रीमण्डनो गुणवतां भुवि सूत्रधारः ॥११६॥

इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे प्रासादमण्डने
अष्टमोऽध्यायः समाप्तः । श्रीः ।

---

"Aho Shrut Gyanam"

श्रीगणेशाय नमः । श्रीजैंयति ।

# राजवल्लभमण्डनम्

[ मङ्गलाचरणम् ]

आनन्दं वो गणेशार्कविष्णुगौरीमहेश्वराः ।
देवाः कुर्युः श्रियं सौख्यमारोग्यत्वं गृहे सदा ॥१॥

देवं नमामि गिरिजात्मजमेकदन्तं
सिन्दूरचर्चितवपुःसुविशालशुण्डम् ।
नागेन्द्रमण्डिततनुं युतसिद्धिबुद्धिम्
सेव्यं सुरोरगनरैः सकलार्थसिद्ध्यै ॥२॥

या ब्रह्माद्यैरलक्ष्या त्रिभुवननमिता ब्रह्मपुत्री शिवाद्या
ब्रह्मा विष्णुश्च रुद्रः प्रणमति बहुशो यां सदानन्तरूपाम् ।
वाणी चैतन्यरूपे वसति च सकले प्राणिनिद्राक्षुधातृट्
सा नित्यं सुप्रसन्ना वितरतु विभवं विश्वरूपा च लोके ॥३॥

[1]कम्बीसूत्रांबुपात्रं वहति करतले पुस्तकं ज्ञानसूत्रम्
हंसारूढस्त्रिनेत्रः सुरमुकुटशिराः सर्वतोवृ······थः ।
त्रैलोक्यं येन सृष्टं सकलसुरगृहं राजहर्म्यादि······
देवोऽसौ सूत्रधारो जगदखिलहितः पातु वो विश्वकर्मा ॥४॥

स्त्रीपुत्रादिकभोगसौख्यजनकं धर्मार्थकामप्रदम्
जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम् ।
वापीदेवगृहादिपुण्यमखिलं गेहात् समुत्पद्यते
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः ॥५॥

---

1. रूपमण्डने ग्रन्थकारेण 'कम्बा'शब्दः प्रयुक्तः । अत्रापि 'कम्बे'ति पाठान्तरमस्ति ।

"Aho Shrut Gyanam"

सिद्ध्यै गृहारम्भमुशन्ति वृद्धा यथोदिते मासि वलक्षपक्षे ।
शशाङ्कवीर्ये सुदिने निमित्ते शुभे रवौ सौम्यगते प्रवेशः ॥६॥

चैत्रे शोककरं गृहादि रचितं स्यान्माधवेऽर्थप्रदं
ज्यैष्ठे मृत्युकरं शुचौ पशुहरं तद्वित्तदं श्रावणे ।
शून्यं भाद्रपदेऽश्विने कलिकरं भृत्यक्षयं कार्तिके
धान्यं मार्गसहस्ययोर्दहनभीर्माघे श्रियः फाल्गुने ॥७॥

आदित्ये हरिकर्कनक्रघटगे पूर्वापरास्यं गृहं
कर्त्तव्यं तुलमेषवृश्चिकवृषे याम्योत्तरास्यं तथा ।
द्वारं भिन्नतया करोति कुमती रोगोऽर्थनाशस्तदा
कन्यामीनधनुर्गते मिथुनगे चास्मिन्न कार्यं गृहम् ॥८॥

कन्यादित्रिषु पूर्वतो यमदिशि त्याज्यं च चापादितो
द्वारं पश्चिमतस्त्रिके जलचरात् सौम्यां रवौ युग्मतः ।
यस्माद्वत्सुमुखं दिशासु भवनं द्वारादिकं हानिकृत्
सिंहं चापि वृषं च वृश्चिकघटौ याते हितं सर्वतः ॥९॥

प्राची मेषतुलारवावुदयति स्याद्वैष्णवे वह्निभे
चित्रास्वातिभमध्यगा निगदिता प्राची बुधैः पञ्चधा ।
प्रासादो भवनं करोति नगरं दिग्मूढमर्थक्षयम्
हर्म्ये देवगृहे पुरे च नितरामायुर्धनं दिङ्मुखे ॥१०॥

तारे मार्कटके ध्रुवस्य समतां नीतेऽवलम्बे नते
दोपाग्रेण तदैक्यतश्च कथिता सूत्रेण सौम्या दिशा ।
शङ्कोर्नेत्रगुणेन मण्डलवरे च्छायात्र या मत्स्ययो-
र्जाता यत्र युतिस्तु शङ्कुतलतो याम्योत्तरे सस्फुटे ॥११॥

"Aho Shrut Gyanam"

राशीनामलिमीनसिंहभजतां पूर्वामुखं शोभनं
कन्याकर्कटनक्रराशिगृहिणां याम्याननं मन्दिरम् ।
राशेर्धन्वितुलायुगस्य सदनं शस्तं प्रतीचीमुखम्
पुंसां कुम्भवृषाजराशिभजतां सौम्याननं स्याद् गृहम् ॥१२॥
श्वेता ब्राह्मणभूमिका च घृतवद्गन्धा शुभस्वादिनी
रक्ता शोणितगन्धिनी नृपतिभूः स्वादे कषाया च सा ।
स्वादेऽम्ला तिलतैलगन्धमुदिता पीता च वैश्या मही
कृष्णा मत्स्यसुगन्धिनी च कटुका शूद्रेति भूलक्षणम् ॥१३॥
स्वादे भवेद्या मधुरा सिताभा चतुर्षु वर्णेषु मही प्रशस्ता
स्नेहान्विता बभ्रुभुजङ्गयोर्वा सुहृद्वती चाखुबिडालयोर्वा ॥१४॥
परीक्षितायां भुवि विघ्नराजं समर्चयेच्चण्डिकया समेतम् ।
क्षेत्राधिपं चाष्ट दिशाधिनाथान् सपुष्पधूपैर्बलिभिः सुखाय
॥१५॥
खातं भूमिपरीक्षणे करमितं तत् पूरयेत्तन्मृदा
हीने हीनफलं समे समफलं लाभो रजोवर्धने ।
तत् कृत्वा जलपूर्णमाशतपदं गत्वा परीक्ष्यं पुनः
पादोनेऽर्धविहीनकेऽथ निभृते मध्याधमेष्टावनी ॥१६॥
भूमेः प्राक् प्लवनं च शङ्करककुप्सौम्याश्रितं सौख्यदं
वह्नौ वह्निभयं यमे च मरणं चौराद्भयं रक्षसि ।
वायव्ये प्लवनं च धान्यहरणं स्याच्छोकदं वारुणे
विप्रादेरनुवर्णतश्च सुखदं सृष्टिक्रमात् सौम्यतः ॥१७॥
अग्नौ राक्षसवायुशङ्करदिशि स्थाप्याः क्रमात् कीलकाः
अश्वत्थात् खदिरात् शिरीषबकुलाद्वृक्षात् क्रमेण द्विजात् ।

"Aho Shrut Gyanam"

वर्णानां कुशमुञ्जकाशशणजं सूत्रं क्रमात् सूत्रणे
निम्ना भूः स्फुटितोषरा विलवती शल्यैर्युता नो शुभा ॥१८॥

प्रश्नत्रयं चापि गृहाधिपेन
देवस्य वृक्षस्य फलस्य वापि ।
वाच्यं हि कोष्ठेऽक्षरसंस्थिते च
शल्यं विलोक्यं भवनेषु दृष्ट्वा ॥१९॥

वाकाचाटाताएहसापापवर्णाः
प्राच्यादिस्थे कोष्ठके शल्यमुक्तम् ।
केशाङ्गाराः काष्ठलोहास्थिकाद्या-
स्तस्मात् कार्यं शोधनं भूमिकायाः ॥२०॥

शल्यं गवां भूपभयं हयानां रुजं शुनोत्वोः कलहप्रनाशौ ।
खरोष्ट्रयोर्हानिमपत्यनाशं स्त्रीणामजस्याग्निभयं तनोति ॥२१॥

कन्यादौ रवितस्त्रये फणिमुखं पूर्वादिसृष्टिक्रमं
ख्यातं वास्तुवपुर्दिशि(शा?)त्रयगतं लाङ्गूलपृष्ठं शिरः ।
द्वारं तस्य मुखे गृहादि भयदं कुक्षिद्वये सौख्यदं
दुःखं प्राक् खनने शिरोंघ्रिवपुषः कुक्षौ सुखं दक्षिणे ॥२२॥

प्राच्यां नागमुखं बुधैर्निगदितं भाद्राश्विने कार्त्तिके
मार्गात् फाल्गुनशुक्रतः क्रमतया याम्ये जले चोत्तरे ।
क्षेत्रे चाष्टविभाजिते दिनकराद्वारात् खिलेत् काष्ठकान्
शन्यङ्गारकयोश्च तत्र फणिनः शारीरकं नो खनेत् ॥२३॥

शीर्षे मातृपितृक्षयस्तदभितश्चांगे रुजः पुच्छके
पृष्ठे दुष्यति दक्षकुक्षिखनने स्यात् पुत्रधान्यादिकम् ।

"Aho Shrut Gyanam"

पूर्वास्येऽनलखाननं यममुखे खातं शिवे कारये-
च्छोषे पश्चिमगे च वह्निखननं सौम्ये खनेन्नैऋते ॥२४॥
दक्षिणकोणे पूर्वविभागे पूजनपूर्वं शिला समर्प्या।
स्थाप्या शेषशिला दक्षिणतः स्तम्भाः समर्प्या विधानेन ॥२५॥

क्षयेकः(?)ब्रह्मशंभुर्यथा—

सूत्रं भित्तिशिलान्यासं स्तम्भस्यारोपणं तथा।
पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह काश्यपः ॥१॥

नारदः—

नभस्यादिषु मासेषु त्रिषु त्रिषु यथाक्रमम्।
पूर्वादिदिक्शिरो वामपार्श्वाशायां प्रदक्षिणम् ॥२॥

वास्तुशास्त्रेष्युक्तम्—

वास्तोः शिरसि पुछे च वामकुक्षौ च पृष्ठतः।
आयुःकामः खनेन्नैव दक्षकुक्षौ खनिः शुभा ॥३॥

भित्तेर्मूलं स्थापनीयं जलान्ते
पाषाणे वा हेमरत्नैः सगर्भं।
शीर्षे गुर्वी लेपहीनाधिका वा
सन्धिश्रेणी पादहीनार्थहान्यै ॥२६॥
भवनपुरसुराणां सूत्रणे पूर्वमुक्तः
कथित इह पृथिव्याः शोधने च द्वितीयः।
तदनु मुखनिवेशे स्तम्भसंरोपणे स्याद्
भवनवसनकाले पञ्चधा वास्तुयज्ञः ॥२७॥

वृक्षाः क्षीरसकण्टकाश्च फलिनस्त्याज्या गृहाद्दूरतः
शस्ते चम्पकपाटले च कदली जाती तथा केतकी।

"Aho Shrut Gyanam"

यामादूर्ध्वमशेषवृत्तसुरजा च्छाया न शस्ता गृहे
पार्श्वे कस्य हरे रवीशपुरतो जैनानु(न्य?)चण्ड्याः क्वचित् ॥२८॥

सदुग्धवृत्ता द्रविणस्य नाशं कुर्वन्ति ते कण्टकिनोऽरिभीतिम् ।
प्रजाविनाशं फलिनः समीपे गृहस्य वर्ज्याः कलधौतपुष्पाः ॥२९॥

दुष्टो भूतसमाश्रितोऽपि विटपी नोच्छिद्यते शक्तित-
स्तद्विल्वौ च शमीमशोकबकुलौ पुन्नागसच्चम्पकौ ।
द्राक्षापुष्पकमण्डपं च तिलकान् कृष्णां वपेद्दाडिमीं
सौम्यादेः शुभदौ कपीतनवटावौदुम्बराश्वत्थकौ ॥३०॥

उत्सङ्गनामाभिमुखः प्रवेशः स्यात् पृष्ठभङ्गो भवनस्य पृष्ठात् ।
विनाशहेतुः कथितोऽपसव्यः सृष्ट्या प्रशस्तो भवनेऽखिले च ॥३१॥

प्रावेशः प्रतिकायको वरुणदिग्वक्त्रो भवेत् सृष्टितो
वामावर्त्ते उदाहृतो यममुखेऽसौ हीनबाहुर्बुधैः ।
उत्सङ्गो नरवाहनाभिवदनः सृष्ट्या यथा निर्मितः
प्राग्वक्त्रोऽपि च पूर्णबाहुरुदितो गेहे चतुर्धा पुरे ॥३२॥

हस्तः पर्वाष्टयुक्तो मुनिवररचितः पर्व चैकं त्रिमात्रं
माला षण्णां यवानामुदरविमिलिता निस्त्वचामुत्तमानाम् ।
पुष्पैश्चत्वारि पूर्वं तदनु च विभजेदङ्गुलैः पर्वपुष्पैः
र्निग्रन्थी रक्तकाष्ठो मधुमय उदितः खादिरो वंशधात्र्योः ॥३३॥

ज्येष्ठोऽष्टाभिरथोदरै(यवै?)स्तु मुनिभिर्मध्यस्तु षड्भिर्लघु-
र्माप्यश्चोत्तमकेन ग्रामनगरं क्रोशादिकं योजनम् ।
प्रासादप्रतिमे नृपस्य भवनं मध्येन हर्म्यादिकं
यानं षड्यवसम्भवेन शयनं छत्रासनास्त्रादिकम् ॥३४॥

"Aho Shrut Gyanam"

रुद्रो वायुर्विश्वकर्मा हुताशो
ब्रह्मा कालस्तोयपः सोमविष्णू ॥
पुष्पे देवा मूलतोऽस्मिंश्च मध्यात्
पश्चाष्टांत्यं द्व्यग्निवेदैर्विभज्यम् ॥३५॥

ईशो मारुतविश्ववर्वह्निविधयः सूर्यश्च रुद्रो यमो
वैरूपो वसवोऽष्ट दन्तिवरुणौ षड्वक्त्र इच्छा क्रिया ।
ज्ञानं वित्तपतिर्निशाकरजयौ श्रीवासुदेवो हली
कामो विष्णुरिति क्रमेण मरुतो हस्ते त्रयोविंशतिः ॥३६॥

उच्चाटनं रोगभयं च दुःखं वह्निभयं पाड़नकं प्रजायाः ।
मृत्युर्विनाशोऽपि धनक्षयः स्या न्मोहः क्रमाद्दैवतपीड़नेन ॥३७॥

हस्तो यत्नात् पुष्पयोरन्तराले
त्वष्ट्रा धार्यो मन्दिरादेर्निवेशे ।
हस्ताद् भूमौ यात्यकस्मात्तदासौ
कार्ये विघ्नं दुःखमाविष्करोति ॥३८ ॥

तालो द्वादशमातृ[त्रि?]कापरिमितस्तालद्वयं स्यात् करः
पादोनद्विकरोऽपि किष्कुरुदितश्चापश्चतुर्भिः करैः ।
क्रोशो दण्डसहस्रयुग्ममुदितो द्वाभ्यां च गव्यूतिका
ताभ्यां योजनमेव भूमिरखिला कोटीशतं योजनैः ॥३९॥

सूत्राष्टकं दृष्टिनृहस्तमौञ्जं
कार्पासजं स्यादवलम्बसंज्ञम् ।
काष्ठं च सृष्ट्याख्यमतोऽपि लेख्य-
मित्यष्ट सूत्राणि वदन्ति सन्तः ॥४०॥

इति श्री वास्तुशास्त्रे राजवल्लभमंडने मिश्रकलक्षणं नाम प्रथमोऽध्यायः ॥१ ॥

८

"Aho Shrut Gyanam"

# द्वितीयोऽध्यायः

संग्रामेंऽधकरुद्रयोश्च पतितः स्वेदो महेशात् क्षितौ
तस्माद् भूतमभूच्च भोतिजननं द्यावापृथिव्योर्महत् ।
तद्देवै रभसा विगृह्य निहितं भूमावधोवक्त्रकम्
देवानां वसनाच्च वास्तुपुरुषस्तेनैव पूज्यो बुधैः ॥१॥

प्रासादे भवने तड़ागखनने कूपे च वापीवने
जीर्णोद्धारपुरे च यागभवने प्रारम्भनिर्वर्त्तने ।
वास्तोः पूजनकं सुखाय कथितं पूजां विना हानये
पादौ रक्षसि कं शिवेऽङ्घ्रिकरयोः सन्धौ च कोणद्वये ॥२॥

क्षेत्राकृतिर्वास्तुरिहार्चनीयस्त्वेकांशतो भागसहस्रयुक्तः ।
साधारणोऽष्टाष्टपदोऽपि तेषु चैकाधिकाशीतिपदस्तथैव ॥३॥

ग्रामे भूपतिमन्दिरे च नगरे पूज्यश्चतुःषष्टिकै-
रेकाशीतिपदैः समस्तभवने जीर्णे नवाब्ध्यंशकैः ।
प्रासादे तु शतांशकैस्तु सकले पूज्यस्तथा मण्डपे
कूपे षण्णवचन्द्रभागसहिते वापीतड़ागे वने ॥४॥

ईशो मूर्ध्नि समाश्रितः श्रवणयोः पर्यन्यनामा दिती
आपस्तस्य गले तदंसयुगले प्रोक्तो जयश्चादितिः ।
उक्तावर्यमभूधरौ स्तनयुगे स्यादापवत्सो हृदि
पञ्चेन्द्रादिसुराश्च दक्षिणभुजे वामे च नागादयः ॥५॥

सावित्रः सविता च दक्षिणकरे वामे द्वयं रुद्रतो
मृत्युर्मैत्रगणस्तथोरुविषये स्यान्नाभिपृष्ठे विधिः ।

"Aho Shrut Gyanam"

मेढ्रे शक्रजयौ च जानुयुगले तौ वह्निरोगौ स्मृतौ
पूर्णौ नन्दिगणाश्च सप्तविबुधा गुल्फोः पदोः पैतृकः(?) ॥६॥
ईशस्तु पर्यन्यजयेन्द्रसूर्याः सत्यो भृशाकाशक एव पूर्वे ।
वह्निश्च पूषा वितथाभिधानो गृहक्षतः प्रेतपतिः क्रमेण ॥७॥
गन्धर्वभृङ्गौ मृगपैतृसंज्ञौ द्वारस्थसुग्रीवकपुष्पदन्तताः ।
जलाधिनाथोऽप्यसुरश्च शेषः सपापयक्ष्मापि च रोगनागौ ॥८॥
मुख्यश्च भल्लाटकुबेरशैलास्तथैव बाह्ये दितितोऽदितिश्च ।
द्वात्रिंशदेवं क्रमतोऽर्चनीयास्त्रयोदशैव त्रिदशास्तु मध्ये ॥९॥
प्रागर्यमा दक्षिणतो विवस्वान् मैत्रोऽपरे सौम्यदिशाविभागे ।
पृथ्वीधरोऽसावथ मध्यतोऽपि ब्रह्मार्चनीयः सकलेषु नूनम् ॥१०॥
आपापवत्सौ शिवकोणमध्ये सावित्रकोऽग्नौ सविता तथैव ।
कोणे महेन्द्रेन्द्रजयौ तृतीये रुद्रोऽनिलेन्योऽपि च रुद्रदासः ॥११॥
ईशानबाह्ये चरको द्वितीये विदारिका पूतनिका तृतीये ।
पापाभिधा मारुतकोणके तु पूज्याः सुरा उक्तविधानकैस्तु ॥१२॥
ब्रह्मा वेदपदस्तु तेन समका देवार्यमाद्यास्त्वमो
कोष्ठोष्टौ द्विपदास्तथाष्ट मरुतः कोणेऽर्द्धभागाद् वहिः ।
शेषा एकपदाः सुरास्तु कथिता वेदत्तुकेऽथो नव
ब्रह्मा षट्पदिनोऽर्यमादिविबुधा ईशादयश्चैकशः ॥१३॥

ब्रह्मा कलांशो वसुतोऽर्यमाद्या
कोणेऽष्ट वाह्येऽपि च सार्द्धभागाः ।
विधातृकोणे द्विपदास्तथाष्टौ
शेषाः सुरा एकपदाः शतांशे ॥१४॥

"Aho Shrut Gyanam"

ब्रह्मा जिनांश उदितः शिवतोऽर्यमाद्याः,
कोणेषु सार्द्धपदतोऽपि तथैव चाष्टौ ।
शेषा द्विभागसमका रविभागकोऽयं
पूज्यो रथाश्वगजवाहनकेऽम्बुयन्त्रे ॥१५॥

यन्त्रे त्रयोदशपदैरपि पूजनीय-
स्तत्पञ्चविंशतिरजो दशतोऽर्यमाद्याः ।
कोणेऽब्धयोऽमरगणा वह्निके कलांशा
भद्रेऽब्धिके रसविभागपरे द्विभागाः ॥१६॥

द्वात्रिंशत् कमलासनोऽर्यममुखाः स्युः सूर्यभागाः क्रमात्
कोणे तेऽष्टसुरा द्विभागसहिता बाह्येषु सार्द्धांशकाः ।
अष्टौ रामपदाः पुनर्द्विपदिका षड्भागिनोऽष्टौ सुराः
क्षेत्रे षण्णवचन्द्रभागसहिते स्याद्देवतानां क्रमः ॥१७॥

वेदांशो विधिरर्यमप्रभृतयस्त्र्यंशा नवस्वष्टके
कोणेंऽत्येऽष्टपदार्द्धगाः परसुराः षड्भागहीने पदे ।
वास्तुर्नंदयुगांश एवमधुनाष्टांशैश्चतुःषष्टिकः
सन्धेः सूत्रमितान् सुधीः परिहरेद्भित्तीस्तुलाः स्तम्भकान् ॥१८॥

रेखाद्वयं कोणगतं विधेयमंशान्तरेणैव तु कर्णसूत्रात् ।
यदष्टसूत्रैः कथितं च पद्मं तत्पीडनात् स्वामिधनप्रणाशौ ॥१९॥

प्रोक्तं चतुर्विंशतिलाङ्गुलं यत् पदार्द्धगं हानिकरं प्रजायाः ।
षड्भिस्तु सूत्रैर्मरणाय वज्रं कोणे त्रिशूलं च रिपोर्भयाय ॥२०॥

*परीक्ष्य भूमीमुपसेचयेत्तां सुपञ्चगव्येन ततो विलेख्या ।*
रेखा सुवर्णेन मणिप्रवालैः पिष्टाक्षतैर्वापि पुनस्तदूर्ध्वे ॥२१॥

"Aho Shrut Gyanam"

द्वात्रिंशदंशाः पृथुले च दैर्घ्ये कोणेषु वर्ज्या जिनसंख्यभागाः ।
एतत् पदानां कथितं सहस्रं क्षेत्रं च सर्वोत्तममेव वास्तोः ॥२२॥
मध्ये ब्रह्मा पूजनीयः शतांशैश्चत्वारिंशद्भिः पदैर्बाह्यवीथी ।
प्रोक्ता देवा अर्यमाद्या अशीत्या मध्ये कोणेऽष्टौ शतश्चाष्टषष्ट्या
॥२३॥
कोणेऽब्धयो नन्दपदैः सुराश्च शेषाश्च बाह्ये वसुभागिनश्च ।
वीथी च बाह्ये रविभागयुक्तं शतं पदानां कथितं मुनीन्द्रैः ॥२४॥
दुर्गप्रतिष्ठाकरणे निवेशे तथा महार्चासु च कोटिहोमे ।
मेरौ च राष्ट्रे त्वथ ज्येष्ठलिंगे वास्तुः सहस्रेण पदैः प्रपूज्यः ॥२५॥
इति सहस्रपदो वास्तुः ।

त्रिमेखलं शङ्करदिग्विभागे कुण्डं प्रकुर्यात् पुरतो युगास्रम् ।
होमं सुराणां शतमष्टयुक्तं प्रत्येकमष्टाधिकविंशतिं वा ॥२६॥
मध्वाज्यदुग्धैर्दधिशर्कराभ्यां कृष्णैस्तिलैर्व्रीहियवैर्नवान्नैः ।
पालाशदूर्वाकुशदुग्धवृक्षैर्होमं तदन्ते सुरपूजनं च ॥२७॥
ईशे घृतान्नमपरे सघृतौदनं च दद्याज्जयाय हरिताम्बरमेव कूर्मम् ।
रत्नानि पैष्टकमयं कुलिशं सुरेन्द्रे धूम्रं वितानमुदितं च दिवाकरस्य
॥२८॥
गोधूमयुक्तं घृतमेव सत्ये मत्स्यान् भृशे शष्कुलिमन्तरीक्षे ।
वह्नौ शुचिः(?)पूष्णि तथैव लाजा दद्यादधर्मे चणकौदनं च ॥२९॥
मध्वन्नं च गृहक्षताय यमतो मांसौदनं दापयेद्
गन्धर्वे शतपत्रमोदनयुतं भृङ्गेऽजजिह्वां तथा ।
प्रोक्ता नीलयवा मृगाय पितृतो देयाश्च सन्मोदकाः
पैष्टिं कृष्णबलिं तथैव विधिवद्दद्याच्च दौवारिके ॥३०॥

"Aho Shrut Gyanam"

सुग्रीवाय च पूपका गणवरे श्वेतप्रसूनं पयः
पद्मं वारुणके सुराप्यसुरके तैलं तिलाः शेषके
पापाख्येऽपि च पक्वमांसमुदितं रोगाय सर्वौषधी-
र्गोक्षीरं फणिने च मुख्यविबुधे श्रीखण्डभक्तौ तथा ॥३१॥
भल्लाटाय सुवर्णकं धनपतौ मण्डाज्यदुग्धं तथा
शक्तून् पर्वतकेऽदितेस्तु लपिकां दद्याद्दितौ पूरिकाम् ।
तत्क्षीरं दधिकं क्रमेण विहितं त्वापापवत्से तथा
पर्यन्येऽरुणचन्दनं च पयसा युक्तां तथा शर्कराम् ॥३२॥
सावित्रेऽपि च लड्डुकाश्च सवितुः पूपा गुड़ाः सद्घृता
देयं चाथ विवस्वते घृतयुतं दुग्धं तथा मोदकाः ।
इन्द्राख्ये कुसुमस्रगिन्द्रजयके देयं तथा चम्पकम्
मैत्रे दुग्धघृते च गुग्गुलयुतो गन्धस्तथा रुद्रके ॥३३॥
तत्सिद्धमन्नं त्वपि रुद्रदासे रत्नस्य मालां पृथिवीधराय ।
पयस्विनीं गाममृतं घटं च दद्याद्विधौ स्वर्णमतोऽखिलेभ्यः ॥३४॥
सुरास्थिमांसं विहितं चरक्यै तथैव पीतौदनको विदार्यै ।
रक्तौदनैः पूतनिकार्चनीया मत्स्यासवेनापि तथैव पापाः ॥३५॥
मांसं पक्वं पिलिपिञ्जायैतत् जृम्भायै विहितं सद्यः ।
स्कन्दायैतन्मदिरायुक्तं त्वस्थ्यर्यम्णे दिशि पूर्वादौ ॥३६॥
यः पूजयेद्वास्तुमनेन युक्त्या न तस्य दुःखं भवतीह किञ्चित् ।
जीवत्यसौ वर्षशतं सुखेन स्वर्गे नरस्तिष्ठति कल्पमेकम् ॥३७॥
एकपाठमनाच्छिन्नसदनं(?) वलिभोजनम् ।
गृहं न प्रविशेत् धीमान् विपदामाकरं तु तत् ॥३८॥

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने वास्तुलक्षणं नाम द्वितीयोऽध्यायः ।

"Aho Shrut Gyanam"

# तृतीयोऽध्यायः

आयत्तोऽव्ययतारकांशकविधून् राशिं ग्रहाद्यं तथा
धान्यं सौख्ययशोभिवृद्धिरधिका यस्मादतः कथ्यते ।
आयास्तु ध्वजधूमसिंहशुनका गो-रासभेभाः क्रमात्
ध्वांक्षस्त्वष्टम आयभेषु विषमाः श्रेष्ठाः सुराणां गृहे ॥१॥

मानं देवगृहादिभूपसदने शास्त्रोक्तहस्तेन तद्
गेहे कर्मकरेण नाथकरतः शास्त्रेण देयं गृहे ।
आयो दण्डकराङ्गुलादिमपि ते हस्ताङ्गुलेरंशतः
क्षेत्रस्याप्यनुमानतोऽपि नगरे दण्डेन मानं पुरे ॥२॥

आयः कल्प्यो हस्तमेयैः करैश्च
क्षेत्रे मालानिर्मिते मातृकाभिः ।
मध्ये पर्यंकासने मन्दिरे च
देवागारे मण्डपे भित्तिबाह्ये ॥३॥

छत्रे देवगृहे द्विजस्य भवने स्याद्वेदिकायां जले
विस्तारोच्छ्रयवस्त्रभूषणमखागारेषु शस्तो ध्वजः ।
धूमो वह्न्युपजीविनामपि गृहे कुण्डे च होमोद्भवे
सिंहद्वारनृपालयेऽस्त्रनिचये सिंहस्तु सिंहासने ॥४॥

चाण्डाले शुनको विशां तु वृषभो हर्म्यें हयानां हितो
वाणिज्ये धनभोजनस्य भवनेऽथो वाह्यगेहे खरः ।
वादित्रे ख(स्व?)रजीविनामपि गृहे शूद्रे गजो योजितो
याने स्त्रीगृहवाहने च शयने शस्तो गृहे हस्तिनाम् ॥५॥

"Aho Shrut Gyanam"

ध्वांक्षः शिल्पितपस्विने हितकरस्तेषां मुखं नामवत्
ध्वांक्षः काकमुखो विड़ालवदनो धूमो ध्वजो मानुषः ।
सर्वे पक्षिपदा हरेरिव गलो हस्तौ नरस्येव तु
प्राच्याः सृष्टिगताः क्रमेण पतयो ह्यष्टौ च ते सन्मुखाः ॥६॥

देयाः सिंहगजध्वजाश्च वृषभे सिंहध्वजौ कुञ्जरे
सिंहो वै ध्वज इष्यते न वृषभोऽन्यत्रापि देयो बुधैः ।
सिंहो हस्तिवृषे गृहे मृतिकरस्त्वायस्य वक्त्रं गृहं
तस्मिन्नेव च वामदक्षिणदिशाद्वारे स आयः शुभः ॥७॥

व्यासे दीर्घ[दैर्घ्य?]गुणेऽष्टभिर्विभजिते शेषो ध्वजाद्यायको-
ऽष्टघ्ने तद्गुणिते च धिष्णभजिते स्यादृक्षमश्वादिकम्(?) ।
नक्षत्रे वसुभिर्व्ययोपि भजिते हीनस्तु लक्ष्मीप्रद-
स्तुल्यायस्य(?)पिशाचको ध्वजमृते संवर्धितो राक्षसः ॥८॥

तन्मूले व्ययहर्म्यनामसहिते भक्ते त्रिभिस्त्वंशकः
स्यादिन्द्रोपमभूपतौ क्रमवशाद्देवे सुरेन्द्रो हितः ।
वेद्यामेष यमस्तु पण्यभवने नागे तथा भैरवे
राजांशो गजवाजियाननगरे राज्ञां गृहे मन्दिरे ॥९॥

यावद्गृहर्क्षं गणयेत् स्वधिष्णात्ताराविभक्ते नवभिश्च शेषाः ।
बुधैस्तृतीयांसकसंविवर्ज्या या पंचमी सप्तमिका न शस्ता
॥१०॥

*धिष्ण्यानीह च सप्तशः क्रमतया वह्नेस्तु पूर्वादितः*
सृष्ट्या तानि भवन्ति यत्र गृहभं तत्रैव चन्द्रो भवेत् ।

"Aho Shrut Gyanam"

हानिं पृष्ठगतः करोति पुरतः स्वायुःक्षयं चन्द्रमाः।
पार्श्वे दक्षिणवामतः शुभकरोऽग्रे देवराज्ञो गृहे ॥११॥
प्रीतिः स्यात् समसप्तमी च दशमी चैकादशी शोभना
दारिद्र्यं युगला करोति मरणं षष्ठी कलिं पञ्चमी।
मेषोऽश्वित्रितये हरिस्तु पितृभाच्चापस्त्रये मूलतः
शेषैः स्युर्नवराशयोऽपरमते नन्दांशकैस्ते पृथक् ॥१२॥
भौमो वृश्चिकमेषयोर्वृषतुले शुक्रस्य राशिद्वयं
कन्या युग्म बुधस्य कर्कसदनं चन्द्रस्य सिंहो रवेः।
जीवो मीनधनुःपतिर्मृगघटौ मन्दस्य वेद्यं गृहं
मित्राण्यर्ककुजेन्दुदेवगुरवोऽन्ये चारयस्ते मिथः ॥१३॥
दैवर्क्षं श्रुतिपुष्यतोऽश्विनमृगैर्मैत्रानिलं पौष्णकं[भं ?]
हस्तादित्यमथो नरस्य गणनं पूर्वोत्तरा रुद्रभम्।
वक्षोमूलविशाखिकाग्निपितृभं चित्रा धनिष्ठाद्वयं
ज्येष्ठाश्लेषमपीह दैन्यमनुजे मृत्युस्तु दैवे कलिः ॥१४॥
वैरं चोत्तरफल्गुनीयुगलयोः स्वातीभरण्योर्द्वयो
रोहिण्युत्तरषाढयोः श्रुतिपुनर्वस्वोर्विरोधं तथा।
चित्राहस्तभयोश्च पुष्यफणिनोर्ज्येष्ठाविशाखर्क्षयोः
प्रासादे भवनासने च शयने नक्षत्रवैरं त्यजेत् ॥१५॥
विप्राः कर्कटमीनतौलिरुदिता सिंहाजचापा नृपा
विट्कन्यामकरो वृषोऽथ वृषला युग्मं च कुम्भस्तुला।
वर्णेनोत्तमकामिनी च भवनं वर्ज्यं बुधैर्यत्नतः
श्रेष्ठा द्वादशनन्दरागगुणतो विप्रक्रमाद्राशयः ॥१६॥



"Aho Shrut Gyanam"

अश्वोऽश्विनीशतभयोर्यमपूषि हस्ती
छागोऽग्निपुष्य उरगोऽपि विधातृसौम्ये ।
मूलार्द्रयोः शुनक ओतुरहावदित्ये
पूर्वामघासु मत उन्दुर एव योनिः ॥१७॥

गौर्भद्रोत्तरफाल्गुनीत उदितः स्वातौ करे माहिषी
व्याघ्रस्त्वाष्ट्रविशाखयोश्च हरिणो ज्येष्ठानुराधाभयोः ।
पूषाढ़ाश्रवणे कपिर्निगदितो विश्वाभिजिन्नाकुलं
पूभायां वसुभे मृगेन्द्र उदितो वैरं त्यजेल्लोकतः ॥१८॥

आयर्क्षताराव्ययमंशकं च ह्येकत्र कृत्वा विभजेत् क्रमेण ।
तिथ्या च वारेण तथैव लग्नैः शेषैस्तु भान्येव भवेयुरङ्कैः ॥१९॥

दैर्घ्यं पृथुत्वेन च ताड़नीयं तयोर्यदैक्यं पुनरुच्छ्रयेण ।
शेषोऽधिनाथो वसुभाजितेऽस्मिन् समः प्रशस्तो विषमस्तु नैव ॥२०॥

वर्गाष्टकस्य पतयो गरुड़ो विड़ालः सिंहस्तथैव शुनकोरगमूषकैणाः
मेढ़ोऽकका-र-च-ट-ताः प-य-शाश्च वर्गा यः पञ्चमः स रिपुरेव
बुधैर्विवर्ज्यः ॥२१॥

अश्विन्यादिकभत्रयं फणिनिभं चक्रं त्रिनाडुयद्भवं
ह्येकस्यां वरकन्ययोश्च यदि भं तन्मृत्युदं चांशतः ।
नाड़ी सेवकमित्रगेहपुरतस्त्वेका शुभा सव्यधा
आयादित्रिकपञ्चसप्तनवभिस्त्वंगैर्गृहं सौख्यदम् ॥२२॥

गुणगणं लघुदोषसमन्वितं भवनदेवगृहादिकमिष्यते ।
जललवेन शिखी बहुतापवान्न शममेति गुणैरधिको यतः ॥२३॥

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने आयादिलक्षणं नाम तृतीयोऽध्यायः ।

"Aho Shrut Gyanam"

# चतुर्थोऽध्यायः

वापीकूपतड़ागदेवभवनान्यारामयागादिकं
तीर्थानामवगाहनं च विधिवत् कन्याप्रदानादिकम्।
सर्वं पुण्यमिदं नृपः स लभते यः कारयेत् पर्वते
दुर्गं सर्वजनाय शर्मजननं विश्राममेकं परम् ॥१॥

सिंहो वैरिपराभवं प्रकुरुते तिष्ठन् गिरौ गह्वरे
दुर्गस्थो नृपतिः प्रभूतकटकं शत्रुं जयेत् संगरे।
कैलासे नगरं शिवेन रचितं गौर्यादिसंरक्षणे
दुर्गं पश्चिमसागरे च हरिणा तेषां किमत्रोच्यते ॥२॥

भूदुर्गं जलदुर्गमद्रिविषये दुर्गं भवेद् गह्वरे
तेषामुत्तममद्रिमूर्ध्नि रचितं तद्वैरिणां दुर्गमम्।
अन्नाद्यैर्घृततोयतैललवणैः काष्ठैस्तृणाद्यैस्तथा
यन्त्रोपस्करबाणशस्त्रसुभटैः संपूरयेद् भूपतिः ॥३॥

माहेंद्रं चतुरस्रमायतपुरं तत् सर्वतोभद्रकं
वृत्तं सिंहविलोकनं [1]च सुवृतायत्तं तथा वारुणम्।
नन्दाख्यं च विमुक्तकोणमथ नन्दावर्ति स्वस्त्याकृति
प्रोक्तं [2]नन्दविवर्जयन्तमपि ते दिव्यं गिरेर्मस्तके ॥४॥

पुष्पं चाष्टदलोपमं च पुरुषाकारं पुरं पौरुषं
स्तोदं(?) कुक्षिषु भूधरं च कथितं दण्डाभिधं दैर्घ्यकम्।

---

1. 'छपृतनायत्त'मिति क्वचित् पाठः।
2. 'तद्व यववजयन्तमपि तद्दिव्यं' इति क्वचिद्द दृश्यते।

"Aho Shrut Gyanam"

शाक्रं प्राक् सरिता परत्र कमलं याम्ये नदी धार्मिकं
द्वाभ्यां चैव महाजयं च धनदाशायां नदी सौम्यकम् ॥५॥
दुर्गैकेन युतं श्रियाख्यनगरं द्वाभ्यां रिपुघ्नं पुरं
[1]त्वष्टारः कथयन्ति स्वस्तिकमिति प्रोक्ता गुणा त्रिंशतिः ।
भूपानां सुखदा यशोऽर्थफलदाः कीर्त्तिप्रतापोद्भवा
लोकानां च निवासतो विरचिताः प्राक् शम्भुनेमे गुणाः ॥६॥

इति श्रीपुराणां विंशतिगुणाः ।

वह्नेर्भीतिकरं त्रिकोणनगरं षट्कोणकं क्लेशदं
वज्रे वज्रभयं च शाकटपुरे रोगस्त्रिशूले कलिः ।
प्रोक्तं तस्करभीतये द्विशकटं व[क?]र्णाधिकेऽर्थक्षयो
दोषाः सप्त भयावहाः प्रकटिता ये विश्वकर्मोदिताः ॥७॥

इति पुराणां सप्तदोषाः ।

वक्ष्येऽथो विविधं पुरं मुनिमतं मध्योत्तमं कन्यसं
तेषां हस्तसहस्र[2]मन्तिमपुरं मध्यन्ततः साधकम् ।
ज्येष्ठं युग्मसहस्रभेषु चरमं भागाष्टकेनान्वितं
मध्यं द्वादशभागतः शशिकलं ज्येष्ठं विदध्यात् सुधीः ॥८॥
मार्गाः सप्तदशैव चादिमपुरे हीनं चतुर्भिः पुरं
प्रोक्तं कन्यसमेव मार्गनवभिर्दैर्घ्ये तथा विस्तरे ।
ग्रामश्चैव पुरार्धतो हि तदनु ग्रामार्धतः खेटकं
खेटार्धेन तु कूटमेव विबुधैः प्रोक्तं तथा खर्वटम् ॥९॥
हस्तानां च युगाष्टषोड़शसहस्रं भूपतीनां पुरं
तन्मध्ये दशधा वदन्ति मुनयो वृद्ध्या सहस्रेण तत् ।

1. 'त्वष्टास्त्र'मिति क्वचित् पाठः । 2. '-मन्त्यमपर' मिति क्वचित् पाठः ।

"Aho Shrut Gyanam"

आयामे वसुपादसार्धवसुतो भागः प्रशस्तोऽधिक-
स्त्वेकैकं च चतुर्विधं निगदितं कार्यं समं कर्णयोः ॥१०॥

षट्त्रिंशतः षट्क्रमतो विवृद्ध्या देवे पुरे चत्वरके क्रमेण।
यदृच्छया मानमुशन्ति केचित् प्राकारकोष्ठस्य च भित्तिकायाः ॥११॥

पूर्वापरास्याः पुरसम्मुखाश्च देवाः शुभा नोत्तरदक्षिणाश्च।
भङ्गं पुरस्यापि पराङ्मुखास्ते कुर्वन्ति धातार्कजनार्दनेशाः ॥१२॥

ब्रह्मा विष्णुशिवेन्द्रभास्करगुहाः पूर्वापरास्याः शुभाः
प्रोक्तौ सर्वदिशामुखौ शिवजिनौ विष्णुर्विधाता तथा।
चामुण्डा ग्रहमातरो धनपतिर्दैमातुरो भैरवो
देवा दक्षिणदिङ्मुखाः कपिवरो नैर्ऋत्यवक्त्रो भवेत् ॥१३॥

मार्गाः सप्तदशाङ्कपञ्चशिखिनो युग्मं पुरात् खर्वटं
मार्गाः षोडशसूर्यविंशतिकराः कार्यास्त्रिधा विस्तरे।
प्राकारोदयविंशहस्तमभितो द्वाभ्यां विहीनाधिको
व्यासार्धेन तदूर्ध्वतश्च कपिशीर्षाण्यष्ट[1]मांशांतरे ॥१४॥

प्राकारेऽपि च कोष्ठका दशकराः सूर्येन्द्रहस्तास्तथा
प्रोक्तास्तेन समैव कोणसहिता विद्याधरीमध्यगाः।
तस्यां वाथ सुवृत्तके च विविधं युद्धासनं कारयेत्
प्राकारोदयतो विधाय परिखाविस्तार उक्तो बुधैः ॥१५॥

विद्याधरीकोष्ठकयोश्च मध्ये बाहुप्रमाणं शररामहस्तम्।
पञ्चाधिकं पञ्चकरेण हीनमिति त्रिधा वास्तुमतो हितञ्च ॥१६॥

1. 'मात्रान्तर'मिति क्वचित् पाठः।

"Aho Shrut Gyanam"

दुर्गोदयं नन्दकरप्रमाणं तिथ्या समं सप्तदशैव केचित् ।
एकोनविंशत्(?)पृथुलं त्रयाणां दिक्पा[का]लसूर्याष्टकरं[रा]वदन्ति
॥१७॥

ताम्बूलं फलदन्तगन्धकुसुमं मुक्तादिकं यद् भवेद्
राजद्वारसुराग्रतो हि सुधिया कार्यं पुरे सर्वतः ।
प्राग् विप्राश्च नृपा हि दक्षिणदिशि स्युः सौम्यतः शूद्रकाः
कर्त्तव्याः पुरमध्यतोऽपि वणिजो वैश्या विचित्रैर्गृहैः ॥१८॥

ईशे रङ्गकराः कुविन्दरजका वह्नौ च तज्जीविनः
प्रोक्ता अन्त्यजचर्मकारवरटाः स्युः शौण्डिका राक्षसे ।
पण्यस्त्री निर्ऋतौ च मारुतयुते कोणे न्यसेल्लुब्धकान्
वापीकूपतड़ागकुण्डमखिलं तोयं तथा वारुणे ॥१९॥

सिंहद्वारचतुष्टयं च खटकीद्वाराणि चाष्टौ तथा
कर्त्तव्यानि दृढ़ार्गलानि रुचिरैः कापाटकैः सूदृढैः ।
कीर्तिस्तम्भनृपालयामरगृहो हृद्यैः सुधानिर्मितैः
हर्म्यैश्चोपवनैर्जलाश्रययुतैः कार्यं पुरं शोभनम् ॥२०॥

इति नगरप्रमाणानि ।

यन्त्राः पुराणामथ रक्षणाय संग्रामवह्न्यम्बुसमीरणाख्याः ।
विनिर्मितास्ते जयदा नृपाणां भवन्ति पूज्याः सुरया च मांसैः
॥२१॥

हस्ता अष्ट च भैरवो नवकरश्चन्द्रो दशाढ्यो भवेद्
रुद्रो भीमगजोऽपि भास्करकरैर्युग्मं च विश्वैः शिखी ।
प्रोक्तोऽसौ यमदण्ड एव मुनिभिस्तिथ्या महाभैरवो
ह्यष्टौ शङ्करनिर्मिताश्च समरे देवासुरे भैरवे ॥२२॥

"Aho Shrut Gyanam"

यन्त्रे चाष्टकरेऽष्टहस्तफणिनी सूर्याङ्गुलौ[ला] विस्तरे
स्तम्भा मर्कटिका च पञ्जरमतः षट्त्रिंशहस्ता क्रमात् ।
यष्ट्या पृष्ठविभागतोऽपि [1]गदितैस्तुल्योऽष्टमात्राङ्गुलैः
प्रोक्ता कुण्डल[2]वेलिनी च बहितो मध्ये[ध्या?]दशै[शी?] त्यङ्गुलैः
॥२३॥

यष्ट्या दृढां म[क]र्कटिकां विदध्याल्लोहस्य कीलेन च चर्मणापि ।
यन्त्रं प्रकुर्याद्दृढकाष्ठकं च तन्मानया ज्योतिकया समेतम् ॥२४॥
कराङ्गुलैः पञ्जरकस्य दैर्घ्यं ते[के?]षां मते हस्तमिते च यन्त्रे ।
याटीकुलीवह्निजलानिलाख्यास्ते लक्षितज्ञैः परिकल्पनीयाः॥२५॥

इति यन्त्राष्टकप्रमाणानि ॥

नीराश्रयं पुण्यवतां विधेयं मध्ये पुरस्यापि तथैव बाह्ये ।
वाप्यश्चतस्रोऽपि दशैव कूपाश्चत्वारि कुण्डानि च षट् तड़ागाः॥२६॥

कूपाः श्रीमुखवैजयोऽपि तदनु प्रान्तस्तथा दुन्दुभि-
स्तस्मादेव मनाहरश्च परतः प्रोक्तस्तु चूड़ामणिः ।
दिग्भद्रो जयनन्दशङ्करमतो वेदादिहस्तैर्मिता ।
विश्रान्तैः क्रमवर्धितैश्च कथिता वेदादधः कूपिका ॥२७॥

वापी च नन्दैकमुखा त्रिकूटा षट्कूटिका युग्ममुखा च भद्रा ।
जया त्रिवक्त्रा नवकूटयुक्तास्त्वर्कैस्तु कूटैर्विजया मता सा ॥२८॥

सरोऽर्धचन्द्रं च महासरश्च वृत्तं चतुष्कोणकमेव भद्रम् ।
भद्रैः सुभद्रं परिघैकयुग्मं वकस्थलैकद्वयमेव यस्मिन् ॥२९॥

1. 'रवुनै'रिति क्वचित् पाठः । 2. 'वल्लवी'ति क्वचित् पाठः ।

"Aho Shrut Gyanam"

ज्येष्ठं म[मि]तं दण्ड सहस्रकैस्तु मध्यं तदर्धेन ततः कनिष्ठम् ।
ज्येष्ठं करैः पञ्चशतानि दैर्घ्ये तदर्धमर्धं तु पुनः कनिष्ठम् ॥३०॥

भद्राख्यकुण्डं चतुरस्रकं च सुभद्रकं भद्रयुतं द्वितीयम् ।
नन्दाख्यकं स्यात् प्रतिभद्रयुक्तं मध्ये सुभद्रं परिघं चतुर्थम् ॥३१॥

कराष्टतो हस्तशतं प्रमाणं द्वारैश्चतुर्भिः सहितानि कुर्युः ।
मध्ये गवाक्षाश्च दिशो विभागे कोणे चतुष्कास्त्वपि पट्टशालाः
॥३२॥

गङ्गाद्या रवयो हरेश्च दशकं रुद्रा दशैकाधिका
दुर्गा भैरवमातृका गणपतिर्ब्रह्म त्रिकं चण्डिका ।
दुर्वासा मुनिनारदस्तु सकला द्वारावती ला[ली]लिका
लोकाः पञ्च पितामहादिविबुधाः स्युर्मध्यदेशे सदा ॥३३॥

तस्योर्ध्वतः श्रीधरमाडकस्य सन्दर्शनात् पूर्वफलं च काश्याम् ।
स्नानाच्च गङ्गाप्लवनस्य पुण्यं कृतं भवेच्चेद् विधिवद् विधिज्ञैः ॥३४॥

[1]चिरं कृतं जीवनमेव येन तद्गोपदैकेन समं पृथिव्याम् ।
स षष्टिसंख्यं च सहस्रवर्षं स्वर्लोकसौख्यान्यखिलानि भुंक्ते ॥३५॥

ग्रामे वाथ पुरे नरेन्द्रभवनं तत् षोड़शांशं भवेत्
मध्यात् पश्चिमदिक्समाश्रितमिदं दुर्गं भवेद् भूवशात् ।
द्वारं[रा] दक्षिणवामतश्च पुरतः कार्यास्त्रयश्चत्वराः
सर्वं वास्तुगृहादिवासरचना भूपेच्छया कारयेत् ॥३६॥

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने प्राकार-यन्त्र-वापी-कूप-
तड़ागलक्षणं नाम चतुर्थोऽध्यायः ॥४॥

---

1. 'विधारित'मिति क्वचित् पाठः ।

"Aho Shrut Gyanam"

# पञ्चमोऽध्यायः

अथो नृपाणां भवनानि वक्ष्ये चैकातपत्रावनिपालकस्य ।
शतं च हस्ताष्टसमन्वितं च व्यासे गृहं चोत्तममेव तस्य ॥१॥
ये द्वापरे भूमिभुजो भवेयुस्तेषां गृहं हस्तशतं द्विहीनम् ।
तत्र्यंशभूमीश्वरको नृनाथस्त्वष्टाधिकाशीतिकरं गृहं स्यात् ॥२॥
ग्रामैकलक्षद्वयमस्ति यस्य प्रोक्तो महामण्डलिको नरेन्द्रः ।
अशीतिहस्तं द्विकरेण हीनं कुर्याद् गृहं शोभनमेव तस्य ॥३॥
पञ्चायुतेशो नृपमण्डलीको भवेद् गृहं तस्य कराष्टषष्टिः ।
सामन्तमुख्यो द्व्ययुताधिपोऽसौ तद्गेहमष्टेषुकरप्रमाणम् ॥४॥
तद्वेश्म पञ्चाशदपि द्विहीनं सामन्तसंज्ञोऽयुतनाथ एव ।
तथा तृतीयोऽपि ततोऽर्द्धहीनस्त्रिंशत्कराष्टाधिकमेव गेहम् ॥५॥
प्रोक्तः प्रवीणैश्चतुराशिकोऽसौ ग्रामा हि यस्यैव सहस्रमेकम् ।
अष्टाधिकं विंशतिहस्तहर्म्यं सिद्ध्यै समस्तानि यथोदितानि ॥६॥
ग्रामाधिपा ये तु शताधिपाश्च ते स्वल्पराष्ट्रा अपसैनिकाश्च ।
तेषां गृहा अष्टदशाधिकैश्च करैः समाना मुनिनिर्मिताश्च ॥७॥
भूपालकार्द्धेन च मन्त्रिगेहं यथाधिकारेण भवन्ति हीनम् ।
व्यासाद्दशांशाधिकमेव दैर्घ्यं कुर्यादतः पञ्चमभागमिष्टम् ॥८॥
गृहं चतुर्हस्तमितं करादिवृद्ध्या द्विरामान्तमिति प्रमाणम् ।
ततः परं भूपतिमन्दिराणि यावच्छतं चाष्टकराभियुक्तम् ॥९॥
स्याद् भूमिरेका वसुहस्तगेहे दशाभिवृद्धा द्वि[ती?]तया पुनश्च ।
प्रासाद एवामरभूपयोश्च हर्म्याणि लोके मुनिनोदितानि ॥१०॥



"Aho Shrut Gyanam"

शालाया नवधा च पञ्चकरतो मानं च विश्वान्तकं
भित्तेरेव चतुर्दशाङ्गुलमितिर्यावत् सपादं करम् ।
आगारस्य तु षोड़शांशसहितोऽप्यर्द्धेन हीनोऽथवा
भित्तेर्मानमिदं त्रिधा विरचितं कल्प्यं यथायोगतः ॥११॥
दैर्घ्ये चन्द्रकलाङ्गुलोत्तमशिला मध्याङ्गुलो नान्तिमा
व्यासो दिग्नवभूमृदुच्छ्रुतिरपि त्र्यंशेन विस्तारतः ।
हस्तादेस्त्रिकरोदयं नवविधं पीठं गृहे सर्वतो
विप्रादे रसभूतवेदगुणकाः स्युः पीठके मेखलाः ॥१२॥
षष्ट्या वाथ शतार्द्धसप्ततियुतैर्व्यासस्य हस्ताङ्गुलै-
र्द्वारस्योदयको भवेच्च भवने मध्यः कनिष्ठोत्तमौ ।
दैर्घ्यार्द्धेन च विस्तरः शशिकला भागेऽधिकं शिष्यते
दैर्घ्यं त्र्यंशविहीनमर्द्धरहितं मध्यं कनिष्ठं क्रमात् ॥१३॥
ज्येष्ठा प्रतोली तिथिहस्तसंख्या प्रोक्तोदये विश्वकरा च मध्या
कनिष्ठिका रुद्रकरा क्रमेण व्यासेऽष्ट सप्तैव च रागसंख्या ॥१४॥
वेश्मव्यासकलांशके युगगणैर्हस्तैस्त्रिसार्द्धैर्युते
हर्म्यस्य त्रिविधोदयः क्षितितलाद् यावच्च पट्टोर्द्धकम् ।
एकैकोऽपि पुनस्त्रिधा निगदितः सर्वे त एकादश
क्षोण्याः षण्णवतौ नखाः शशिकला अष्टादशाढ्यास्त्रिधा ॥१५॥
त्रिस्थाने युगपर्वतास्तिथियुता धिष्णैकविंशान्विता
मध्योऽयं त्रिकरैस्तदंशसहितैः प्रोक्तः कनिष्ठस्त्रिधा ।
वृत्तं दग्धविशुष्ककण्टकयुतं नीड़ैस्तु चैत्यद्रुमं
क्षीरं मारुतपातितं च भवने चिञ्चाविभीतं त्यजेत् ॥१६॥

"Aho Shrut Gyanam"

शाकः शालमधूकसर्ज्जखदिरा रक्तासनाः शोभना
एकोऽसौ सरलोऽर्ज्जुनश्च पनस-श्रीपर्णिनी-शिंशपाः ।
हारिद्रः पिचुमर्दचन्दनतरुः पद्माह्वकस्तिन्दुकी
नैतेऽन्येन युता भवन्ति फलदाः शाकादयः शोभनाः ॥१७॥

गेहोदयन्तु विभजेन्नवधा षडंशः
स्तम्भोऽर्द्धभागसमकं भरणं शिरश्च
कुम्भी ह्युदुम्बरसमैकविभागतुल्या
पट्टश्च तन्त्रक[1]युतोंऽशसमान एव ॥१८॥

शालालिन्द उदाहृतो हि विबुधैर्वाणेषुयुग्मांशकः
सप्तांशेषुगुणैश्च नन्दपदतो वेदांशतुल्यस्तथा ।
कापाटं गृहदक्षिणे निगदितं वामे भवेदर्गला
सृष्ट्या निष्क्रमणं कृतं मुनिवरैर्द्वारेषु सर्वेषु यत् ॥१९॥

शालाजिनांशैर्मनुरेव मध्ये त्रयो हयान्तर्द्वयमस्य पार्श्वे ।
द्वारोत्तमाङ्गेन समानकर्णाः शस्ता न शस्ता भवनाभिवक्त्राः ॥२०॥

दीपालयो दक्षिणदिग्विभागे सदा विधेयोऽर्गलया समानः ।
वामे च मध्ये न शुभश्च गेहे सुरालये वामदिशासु सिद्ध्यै ॥२१॥

द्वाराग्रे खटकीमुखं च तदधो द्वाःषोड़शांशाधिकं
सर्वं द्वाःशुभमिच्छता च सततं कार्यं तु पट्टादधः ।
तन्न्यूनं न शुभं तुलातुलगतं कुक्षौ तथा पृष्ठजं
काष्ठं पश्चक एव नीतिरहितं यन्मूलपूर्वोत्तरम् ॥२२॥

1. 'तल्लिक'- इति पाठान्तरम् ।

"Aho Shrut Gyanam"

द्वारोर्ध्वे यद्द्वारमस्य प्रमाणं संकीर्णं वा शोभनं नाधिकं तत् ।
ह्रस्वद्वाराण्येव यानि पृथूनि तेषां शीर्षाण्येकसूत्राणि कुर्यात् ॥२३॥

सर्वं द्वारं [1]चीयमानं रुजायै यद्वा ह्रस्वं तत् करोत्यर्थनाशम् ।
गेहाद्यं यत् पूर्ववास्तुस्वरूपं तेषां भङ्गान्नैव [2]सौख्यं कदाचित् ।२४।

द्वारव्यासरदांशतोऽधिकमिदं कार्यं गृहं दक्षिणे
तुल्यं हस्तिगृहं च वाजिसदनं तेनाधिकं वामतः ।
अष्टांशे च नवांशके च वितथे तोये जयेन्द्रे हितं
द्वारं सौम्यगृहक्षते च कुसुमे भल्लाटके शस्यते ॥२५॥

प्राग् द्वाराष्टकमध्यतोऽपि न शुभं सूर्येशपर्जन्यतो
याम्यायां च यमाग्निपौष्णमपरे शोषासुरं पापकम् ।
सौम्यायामथ रोग-नाग-गिरिजं त्याज्यं तथान्यच्छुभं
कैश्चिद्वारुणसौम्यकं नहि हितं प्रोक्तं च वातायने ॥२६॥

द्वारं विद्धमशोभनं च तरुणा कोणभ्रमस्तम्भकैः
कूपेनापि च मार्गदेवभवनैर्विद्धं तथा कीलकैः ।
उच्छ्रायाद् द्विगुणां विहाय पृथिवीं वेधो न भित्त्यन्तरे
प्राकारान्तर-राजमार्गपुरतो वेधो न कोणद्वये ॥२७॥

दैर्घ्ये सार्द्धशताङ्गुलं च दशभिर्हीनं चतुर्द्धा विधिः
प्रोक्तं चाथ शतं त्वशीतिसहितं युग्मं नवत्या शतम् ।
तद्वत् षोड़शभिः शतं च नवभिर्युक्तं तथाशीतिकं
द्वारं मत्स्यमतानुसारि दशकं योग्यं विधेयं बुधैः ॥२८॥

1. 'मीयमान'मिति पाठान्तरम् । 2. 'सूत्र'मिति क्वचित् पाठः ।

"Aho Shrut Gyanam"

स्त्रयमपि च कपाटोद्घाटनं वा पिधानं
भयदमधिकहीनं शाखयोर्वा विचालैः ।
पुरुषयुवतिनाशः स्तंभशाखाविहीनं
भयदमखिलकाष्ठाग्रं यदाधः स्थितं स्यात् ॥२६॥

देवालयं वा भवनं मठश्च भानोः करैर्वायुभिरत्र भिन्नम् ।
तन्मूलभूमौ परिवर्ज्जनीयं छाया गता यस्य गृहस्य कूपे ॥३०॥

नैको लघुर्वामदिशाविभागे मध्ये द्विषट्दारुणवर्णगेहे ।
स्तम्भासनं हीनमपि क्षयाय यदाधिकं रोगकरन्तदा स्यात् ॥३१॥

स्तम्भोऽष्टांशसुवृत्तभद्रसहितो रूपेण वालङ्कृतो
युक्तः पल्लवकैस्तथा भरणकं यत् पल्लवेनावृतम् ।
कुम्भी भद्रयुता कुमारसहिता शीर्षं तथा किंनराः
एवं चेति गृहे न शोभनमिदं प्रासादके शस्यते ॥३२॥

स्तम्भो द्वयोर्मध्यगतो न शस्तः शुभङ्करौ पट्टयुगांशतो द्वौ ।
गृहे प्रशस्ताश्चतुरस्रकास्ते स्तम्भा न कन्देन विना प्रशस्ताः ॥३३॥

हानिस्तुलामध्यगता खनस्य[1] स्तम्भे भदन्तालयभित्तिमूषाः ।
संलग्नचत्वार्यपि हानये स्युः स्तम्भासनं स्तम्भशिरश्च शीर्षे ॥३४॥

उत्सेधार्द्धविनिर्गतं शरयुगांशेनाधिकं शस्यते
च्छाद्यं पट्टसमानकं सुखकरं नाशाय निम्नोन्नतम् ।
तत् काकस्य च पत्तवच्च कुमुदाभं [2]सौर्यकारापकम्(?)
प्रालम्बं च करालकं च विबुधैः प्रोक्तश्च तत् षड्विधम् ॥३५॥

1. 'षणस्ये'ति पाठान्तरम् । 2. 'सूर्य-काळायक'मिति पाठान्तरम् ।

"Aho Shrut Gyanam"

भूम्यारोहणमूर्ध्वतस्तदुपरि प्रादक्षिणं शस्यते
द्वारन्तूर्ध्वभवं च भूमिरपरा ह्रस्वार्कभागैः क्रमात्।
प्रासादे च मठे नरेन्द्रभवने शैलः शुभो नो गृहे
तस्मिन् भित्तिषु बाह्यकास्तु शुभदाः प्राग्भूमिकुम्भ्यां तथा ॥३६॥

पृष्ठेक्षणानन्तरमेव बाह्यात् गृहप्रवेशो न शुभङ्करोऽसौ।
गृहस्य पृष्ठे यदि राजमार्गस्तदादिभूमेर्नहि पृष्ठमीक्ष्यम् ॥३७॥

जीर्णं गेहं भित्तिभग्नं विशीर्णं तत् पातव्यं स्वर्णनागस्य दन्तैः।
गोश्रृङ्गैर्वा शिल्पिना निश्चयेन पूजां कृत्वा वास्तुदोषो न तस्य ।३८।

हर्म्यस्यापि समृद्धितो गृहपतिर्वृद्धिं यदापोहते
सर्वाशासु विवर्द्धितं च फलदं दुष्टं तदेकत्र च।
प्राग्मित्रैरपि वैरमुत्तरदिशाभागे मनस्तापकृत्
पश्चादर्थविनाशदक्षिणदिशि(?) शत्रोर्भयं वर्द्धते ॥३९॥

वामाङ्गे(?) धनवस्त्रदेवभवनं धातुश्रियो वाजिनो
नार्यस्त्रौषधभोजनस्य भवनं स्याद्वाटिका वामतः।
वह्नै गो-जल-दन्ति-शस्त्रसदनं स्त्रीणां तथा दक्षिणे
स्थानं माहिषमाजमौर्णिकमिदं याम्याग्निमध्ये शुभम् ॥४०॥

सुग्रीवे वरुणे सुरे गणवरे स्याद् घोटकानां गृहं
द्वास्थे युद्धगृहं च नृत्यकरणं गान्धर्ववेदाश्रितम्।
राज्ञो मातृगृहं जयेन्द्रजयके रुद्रे महिष्या गृहं
सत्ये धर्मगृहं रवौ व्ययगृहं प्रोक्तं जये श्रीगृहम् ॥४१॥

"Aho Shrut Gyanam"

इशप्राच्योरन्तरे गर्इभाना-
मुष्ट्राणां वा स्थानमेवात्र कार्यम् ।
धान्यागारं स्यात्तथा प्राणकोणे
भृङ्गेऽप्येवं शम्भुकोणे शिवार्चा ॥४२॥

प्राक् पश्चिमे मारुतवह्निकोणे प्रोक्ता प्रवीणैरपि भृ[नृ]त्यशाला ।
वर्चोगृहं रात्रिचरस्य कोणे प्राक्पश्चिमे भोजनशालिका च ॥ ३॥

प्राक् शोभा नृपमन्दिरे च पुरतः स्थानं तथा पुत्रकं
वामाङ्गे नृपतेस्तथायुधधराः कृष्णा [1]तनुत्रापि च ।
छत्रं चामरतापसाः स्वगुरवस्ताम्बूलधृग् दक्षिणे
गेहाधोशयदृच्छयाथ शयनं सर्वासु भूमीषु च ॥४४॥

विवस्वदाख्येऽध्ययनं प्रशस्तं वादित्रगेहं सवितुर्विधेयम् ।
पूषाश्रितं भोजनमन्दिरं च महानसं वह्निदिशो विभागे ॥४५॥

माहेन्द्राख्ये गोपुरं द्वित्रिभूमिं
भानोः संख्या तस्य मध्ये विधेया ।
उक्तानुक्तं मन्दिरादौ निवेशे
त्वष्टा कार्यं चाज्ञया भूपतीनाम् ॥४६॥

दिक्शालान्तं ह्येकशालादिगेहं
ज्येष्ठा मध्या कन्यसा दक्षिणाङ्गात् ।
शाला कार्या लोकगेहे युगान्तात्
त्रिद्व्येकाः स्युर्भूमयस्तेषु नूनम् ॥४७॥

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने राजगृहनिवेशादि-
लक्षणं नाम पञ्चमोऽध्यायः ॥

1. –'तपत्राणि च' इति क्वचित् पाठः ।

"Aho Shrut Gyanam"

# षष्ठोऽध्यायः

अथैकशालाद्विगुणाधि[द्वि?]शालं प्रस्तारतो लक्षणमेव तेषाम् ।
यथोदितं वास्तुमते तथैव ब्रवीमि राज्ञामथ मानवानाम् ॥१॥

चत्वारो गुरवस्तु पूर्वगुरुतोऽधो ह्रस्वतोऽन्ये समाः
भूयः पश्चिमपूरितं च गुरुभिर्यावल्लघुत्वं भवेत् ।
उद्दिष्टे द्विगुणाङ्ककैर्लघुभवैः संख्यैकमिश्रीकृते
नष्टे स्तो विषमे समे गुरुलघू रूपे तदर्द्धार्द्धितः ॥२॥
स्थाने लघोः सद्ममुखादलिन्दं प्रदक्षिणान्तं क्रमतो विदध्यात् ।
प्रस्तारतः षोड्शकं गृहाणां प्रोक्तं तथाख्यां कथयामि तेषाम् ॥३॥
ध्रुवं च धान्यं जयनन्दसंज्ञे खराख्यकांते च मनोरमाख्यम् ।
सुवक्त्रमस्मात् किल दुर्मुखाख्यं क्रूरं विपक्षं धनदं क्षयं च ॥४॥
आक्रन्दकं वैपुलवैजये च फलानि नाम्ना सदृशानि तेषाम् ।

इति ध्रुवादिषोड्शगृहाणि ।

धान्यादितोऽष्टौ विजयान्तकं हि त्वलिन्दयुग्मं मुखतो विदध्यात्
॥५॥

रम्यं श्रीधरमोदिते च परतस्तद्वर्द्धमानं गृहं
कारालश्च सुनाभमेव तदनु ध्वांक्षं समृद्धं तथा ।

इति रम्याष्टकम् ।

सर्वाणि ध्रुववद्भवन्ति नितरां षड्दारुकैः सुन्दरं
प्रोक्तं तद्वरदं च भद्रकुमुदेऽथो वैमुखाख्यं शिवम् ॥६॥
तत् सर्वलाभं च विशालसंज्ञं तथा विलक्षं त्वशुभं ध्वजं च ।
उद्द्योतमेवं त्वथ भीषणं च सौम्याजिते स्तः कुलनन्दनं च ॥७॥

इति सुन्दरादिषोड्शगृहाणि ।

"Aho Shrut Gyanam"

पूर्वालिन्दसमस्तकेषु युगलं पट्ट[स्य] शालान्तरे
हंसश्चैव सुलक्षणं च परतः सौम्यं हयं भावुकम्।
तस्मादुत्तमरौचिरे च सततं क्षेमन्तथा क्षेपकम्
चोद्वृत्तं वृषमुत्थितं च व्ययमानन्दं सुनन्दं क्रमात् ॥८॥

इति हंसादिषोड़शगृहाणि ।

मध्येऽपवर्गं ध्रुवकादिकानामलंकृताह्वं प्रथमश्च तत्र ।
ततोऽप्यलङ्कारमिति क्रमेण ख्यातं तदन्यद्भ्रमणश्च पूर्णं ॥९॥

तत्रेश्वरन्तदनु 'पुण्यमतः सुगर्भं प्रोक्तं गृहं कलशदुर्गतमेव रिक्तम्।
स्यादीप्सितं तदनु भद्रकवञ्चिते च दीनं गृहं विभवकामदमेव संख्या ॥१०॥

इत्यलंकृतादिषोड़शगृहाणि ।

षड्दारु सर्वेष्वपवर्गकेषु प्रभावसंज्ञं त्वथ भावितं च।
रुक्मन्तथाऽन्यत् तिलकं च तद्वत् स्यात् क्रीड़नं सौख्यमतो यशोदम् ॥११॥

कुमुदमपि च कालं भासुरं भूषणं च वसुधरमथ गेहं धान्यनाशं तदन्यत् ।
कुपितमपि च वित्तं वृद्धिदं प्रोक्तमेतत् तदनु कुलसमृद्धं षोड़शं प्रोक्तमाद्यैः ॥१२॥

इति प्रभावादिषोड़शगृहाणि ।

सर्वे मुखाऽलिन्दसमन्विताश्च दारुद्विषट्कं ह्यपवर्गमध्ये ।
ततश्च चूड़ामणिकं प्रभद्रं क्षेमं तथा शेषसमुच्छ्रितं च ॥१३॥

---

'पुण्य'मिति पाठान्तरम् ।

११

"Aho Shrut Gyanam"

विशालसंज्ञं त्वथ भूतिदं च हृष्टं विरोधं कथितं क्रमेण।
तत् कालपाशं हि निरामयं च सुशालरौद्रे मुनिसंमताच्च ॥१४॥
मेघं गृहं चैव मनोरमं च सुभद्रसंज्ञं कथिता च संख्या।
इत्येकशालानि गृहाणि विंद्याच्छतं च चत्वार्यधिकं ध्रुवादि ॥१५॥
अपवरकं यत् कथितं तद्वामे धीमता गृहे कार्यम्।
यत् षड्दारुकमुदितं ज्ञेया सा पट्टिकाश्रेणी ॥१६॥

इति चूडामण्यादिषोडशगृहाणि। इत्येकशालगृहचतुरुत्तरशतं सम्पूर्णम्।

अथ द्विशालालयलक्षणानि पदैस्त्रिभिः कोष्ठकरन्ध्रसंख्या।
तन्मध्यकोष्ठं परिहृत्य युग्मं शालाश्चतस्रो हि भवन्ति दिक्षु ॥१७॥

याम्याग्निगा च करिणी धनदाभिवक्त्रा
पूर्वानना च महिषी पितृवारुणस्था।
गावी यमाभिवदनापि च रोगसौम्ये
च्छागी महेन्द्रशिवयोर्वरुणाभिवक्त्रा ॥१८॥

हस्तिन्यो महिषी द्विशालभवनं सिद्धार्थकं तच्छुभं
गावीमाहिषसंज्ञकं मृतिकरं तद्यामसूर्यं भवेत्।
दण्डं च्छागगवान्वितं धनहरं हस्तिन्यजाभ्यां तथा
काचं गोकरिणीयुतं नहि शुभं [1]चुल्ली च पूर्वापरम् ॥१९॥
नामान्यतः संततशान्तिदं च स्याद्वर्द्धमानं त्वथ कुक्कुटाख्यम्।
हस्त्यादितो नामचतुष्टयं च हर्म्यं द्विशालं प्रथमं तथैव ॥२०॥
यत् स्वस्तिकं तद्रसदारुमध्येऽलिन्दस्तथाऽग्रे कथितं द्विशालम्।
हंसाख्यकं स्यादथ वर्द्धमानं कीर्त्तेर्विनाशं भवनं चतुर्थम् ॥२१॥

1. 'चुह्लां'-इति पाठः क्वचित्।

"Aho Shrut Gyanam"

अलिन्दयुग्मं पुरतो विदध्यात् षड्दारुमध्येऽपि च शान्तसंज्ञम् ।
तस्माद् गृहे हर्षणवैपुले च तथा चतुर्थं कथितं करालम् ॥२२॥

तस्मिन् गृहे दक्षिणतो ह्यलिन्दे वित्तं च चित्तं धन-कालदण्डे ।
वामे पुनर्बन्धुदपुत्रदं स्यात् सर्वं तु तस्मिन्नपि कालचक्रम् ॥२३॥

लघुश्च पश्चात् पुरतोऽपि युग्मं स्याद्दक्षिणैको रसदारुमध्ये ।
तत् त्रैपुरं सुन्दरमेव नीलं स्यात् कौटिलं चैव यथाक्रमेण ॥२४॥

प्रदक्षिणैकः पुरतोऽपि युग्मं षट्कं गृहांतः किल [1]सारदाख्यम् ।
तथा द्वितीयं खलु शास्त्रदं स्यात् शीलं तथा कोटरमेव संज्ञा ॥२५॥

सौम्यं गृहं मण्डपसंज्ञिकं[हितं?] चेत् तत्तुल्यरूपं विबुधैर्विधेयम् ।
सुभद्रमस्मादपि वर्धमानं क्रूरं च सर्वेष्वशुभं चतुर्थम् ॥२६॥

मुखे त्रयं दक्षिणपश्चिमैकः षड्दारुकं श्रीधरनामधेयम् ।
प्रोक्तं गृहे कामद-पुष्टिदे च चतुर्थकं कीर्त्तिविनाशमेव ॥२७॥

वामे तथा दक्षिणपश्चिमैको युग्मं मुखे मण्डपमग्रतश्च ।
श्रीभूषणं श्रीवसनं ततश्च श्रीशोभकीर्त्तिक्षयमेव तद्वत् ॥२८॥

एकोऽपरे दक्षिणवामतश्च षण्मध्यगं श्रीधरयुग्मपूर्वम् ।
सर्वार्थदं स्यान्मुखतस्त्रयं चेत् लक्ष्मीनिवासं कुपितं च नाम्ना
॥२९॥

युग्मं मुखे मण्डपमेव चाग्रे युग्मं तथा दक्षिणतोऽन्तभित्तिः ।
पृष्ठैक उद्द्योतकबाहुतेजः सुतेज एवं कलहावहं स्यात् ॥३०॥

1. 'शाश्वदाख्य'मिति पाठः क्वचित् ।

"Aho Shrut Gyanam"

उद्द्योतके पश्चिमभागतो द्वौ कुर्याद् द्विशालं च वहिर्निवासम् ।
तत् पुष्टिदं कोपसमानमन्त्यमनुक्तषट्कं क्रमतो विधेयम् ॥३१॥

लघुत्रिकं पूर्वदिशो विभागे एको भवेद्दक्षिणवामपश्चात् ॥
महान्तमेतत् सुहितं च दक्षं कुलक्षयं मण्डपसंयुतं स्यात् ॥३२॥
भ्रमद्वयं [1]तिसृषु दिक्षु भागे मुखे त्रिकं मण्डपमग्रतश्च ।
प्रतापवर्द्धन्यमिदं च दिव्यं सुखाधिकं सौख्यहरं चतुर्थम् ॥३३॥

तस्यैव रूपं रसदारुयुग्मं पुनस्त्वलिन्दो जगतं ततश्च ।
स्यात् सिंहनादस्त्वथ हस्तियानं ज्ञेयं तथा कण्टकमेतदेव ॥३४॥

शान्तादिगेहानि च षोडशैव द्विशालकानीह यथाक्रमेण ।
नामानि चत्वार्यपि रूपमेकं हस्त्यादिभेदैः क्रमतो विधेयम् ॥३५॥

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने एकशाल-द्विशालगृह-
लक्षणं नाम षष्ठोऽध्यायः ॥६॥

1. 'दिक्त्रितये विभागे'—इति पाठान्तरम् ।

"Aho Shrut Gyanam"

# सप्तमोऽध्यायः

द्विशालगेहानि च षोड़शैव वास्तूदधेः सारतरं पुनश्च ।
वक्ष्याम्यलिन्दोक्षणकालघुश्च(?) द्वौ तिन्दुकाख्यौ कथितावलिन्दौ ॥१॥

सूर्यं द्विशालं लघुरस्य वामे मुखे त्रिकं दक्षिणतस्तथैकः ।
वेदा मुखे वासवमेव गेहं वामेऽपसव्ये लघुरेक एव ॥२॥

प्रासादसंज्ञं मुखतस्त्रयं च प्रदक्षिणं तिन्दुकवेष्टितं स्यात् ।
अलिन्दयुक्तं विमलं 'तथैव तद्वीर्यवन्तं सह मण्डपेन ॥३॥

अथ द्विशालेषु समस्तकेषु मध्ये विदध्याद्रसदारु चैकम् ।
तदा भवेद्भासुरमग्रयुग्ममेको लघुर्दक्षिणदिग्विभागे ॥४॥

एको लघुर्दक्षिणपूर्वतः स्यात्तदुन्दुभाह्वं मुखमण्डपेन ।
द्वौ पूर्वतो दक्षिणतस्तथैको युग्मं भवेन्मण्डपगं सुतेजः ॥५॥

मुखे गुणा दक्षिणतस्तथैको द्वौ मण्डपेऽस्मिन् हयजाभिधानम् ।
महान्तगेहं मुखगे त्रिके तु युग्मान्वितं मण्डपमेतदेव ॥६॥

मुखे तथा मण्डपके च युग्मं वामेऽपसव्ये युगलं लघोश्च ।
लोकत्रयाडम्बरमस्य नाम षड्क्षरं शम्भुगणेशयोश्च ॥७॥

युग्मं मुखे मण्डपगे[के?] द्वयं स्यात् तथा द्वयं दक्षिणवामतश्च ।
एको हि पश्चाद्धरदाभिधानं श्रीविश्वकर्मोक्तमताद् द्विशालम् ॥८॥

मालीनसंज्ञं मुखगैश्चतुर्भिर्युग्मं भवेद्दक्षिणवामभागे ।
युग्मं तथा पश्चिमदिग्विभागे तस्याग्रतो मण्डप एक एव ॥९॥

---

'द्विशाल'मिति पाठान्तरम् ।

"Aho Shrut Gyanam"

प्राग्रामा लघवो विलासभवने वामे लघुर्दक्षिणे
तच्चेन्मण्ड[1]पसंयुतं च सकलं स्याद्बुद्धिदं सौख्यदम् ।
[2]वेदाः सुन्दरके मुखे च सततं वामे षणो दक्षिणे
तस्याग्रे मुखमण्डपश्च फलदा एवं गृहाः षोडश ॥१०॥

इति सूर्यादिषोडशगृहाणि ।

अथ विशालं त्रिदशेक्षणैकं स्यात्त्रैदशावाससुरूपसंज्ञम् ।
तथा चतुर्थं कुमुदाभिधानं हस्त्यादिभेदैः क्रमतो विधेयम् ॥११॥

छत्रं द्व्यलिन्दं च तथैव पुत्रं हरं च कामं त्वथ ह्रस्वभद्रम् ।
षट्कं च मध्ये स्वधनं कुबेरं पद्मं तथा कामदमेतदेव ॥१२॥

अलिन्दयुग्मं त्वथ भद्रयुक्तं मध्येकपाटं जलजाभिधानम् ।
स्यान्मेघजं चैव गजं कुपं च षड् दारुमध्येष्वखिलेष्वथातः ॥१३॥

स्याद् वैजयं मण्डपह्रस्वभद्रं जयं निनादं त्वथ कीर्त्तिजं च ।
भद्रोनह्रस्वाधिकसाकलाह्वं निर्लोभकं वासद-कौशले च ॥१४॥

त्र्येकं क्रमादीश्वरवारदाख्यं भीमं च कौशल्यमतः क्रमेण ।
तद्वेद बुद्धिस्वजनं तृतीयं स्यात् कोशदं नीलामदं चतुर्थम् ॥१५॥

मुखगुणलघुवामे दक्षिणे चैक एतत्
वरदसरदमुक्तं दण्डकं काकपक्षम् ।
इदमिह हि निनादं मण्डपेनाधिकं स्यात्
तदनु च गजनादं बाहुलं कीर्त्तिजाह्वम् ॥१६॥

1. 'लसंयुतं च कमल'मिति क्वचिद्दृश्यते । 2. 'वेदा-स्तूदरके' इति पाठः क्वचित् ।

"Aho Shrut Gyanam"

स्वष्टयादिरूपमुखमण्डपमेत्र सिंहं
ज्ञेये गृहे वृषगजे त्वपि कोशसंज्ञं ।
वामेऽधिकं च लघुना कथितं सुभद्रं
स्यान्माणिभद्रमपि रत्नजकाश्चनाख्ये ॥१७॥

युगमुखमपरैको भैरवं दक्षिणे च
भरतनरजमेतत् स्याच्चतुर्थं कुबेरम् ।
पुनरपि लघु वामे हस्तियानं वियानं
हयज-कृपज-गेहं तच्चतुर्थं क्रमेण ॥१८॥

वर्णानां शुभदं च सागरगृहं पञ्चैव हस्वा मुखे
प्रोक्तं क्षीरदरत्नदाह्वयमिदं कोलाहलं चापरम् ।
षड्दारुद्वयभद्रसप्तलघवस्तिर्यग्युतं शालया
गान्धर्वं क्षितिभूषणं च कथितं सर्वज्ञकं दर्पकम् ।।१९॥

धन्यं वृद्धिकरं त्रिशालमुदितं शालां विना पाविनी
प्राक्शालारहितं शुभं निगदितं सुक्षेत्रमर्थप्रदम् ।
चुहूलीसंज्ञमिदं करोति मरणं हीनं तथा याम्यया
पक्षघ्नं महिषीमृते च भवनं तत् पुत्रबन्धुक्षयम् ॥२०॥

इति त्रिशाल-त्रिदशादि-षोड़शगृहाणि ।

त्रैशालानि च षोड़श प्रथमतः सोमं च षड्दारुकं
तच्चैकेन पुरोऽपि शङ्करमिदं मध्ये क्रमात् पूर्वतः ।
भद्रे द्वौ मुखतोऽपि दक्षिणलघुस्त्वेकाधिकं सागरं
चत्वारो नृपशोभिते च पुरतः प्राग्दक्षिणैको लघुः ॥२१॥

"Aho Shrut Gyanam"

पश्चाग्रे सकलं भ्रमेश्च लघुना सर्वत्र सौख्यप्रदं
रागाख्यं भ्रमसंयुतं च भवनं तत् सर्वशान्तं भवेत् ।
प्राग्बाणं कुलनन्दनं क्रमतया त्वेकद्वयैकान्वितं
तस्मिन् दक्षिणसंयुते च लघुके कल्याणसंज्ञं तथा ॥२२॥

सर्वाशासु लघुत्रयं शरमुखं तत्पट्टयुग्मं क्रमात्
सौभाग्यैकविवर्द्धनं च भवनं राज्ञां सदा निर्मितम् ।
आनन्दं मुखरागदक्षिणलघुर्वामे च पृष्ठे द्वयं
रागास्यं जनशोभनं गुणगणैकेनान्वितं स्पष्टितः ॥२३॥

स्याद् गोवर्द्धनमग्रतो रसयुतं युग्माग्निनेत्रैः क्रमात्
सप्ताग्रे त्रिगुणं त्रिकश्च लघवो लोकत्रये सुन्दरम् ।
गेहं श्रीतिलकं च भद्रसहितं ह्रस्वेन हीनं मुखे
तद्युक्तं लघुना च भद्रसहितं विष्णुप्रियं भूपतेः ॥२४॥

इति सोमादि-षोड़श-गृहाणि ॥

षड्दारुकं श्रीत्रिदशं त्रिशालं तत् श्रीनिवासं मुखह्रस्वयुक्तम् ।
श्रीवत्सतः श्रीधरमेकवृद्धचा श्रीभूषणं वेदमुखं च गेहम् ॥२५॥

बाणैः श्रीजयमग्रतोपि ऋतुभिः श्रीतैलिकं मन्दिरं
रागाग्रं रसदारुयुग्मसहितं तत् श्रीविशालं भवेत् ।
श्रीतेजोजयमग्रतश्च मुनिभिः षड्दारुयुग्मान्वितं
सोमादित्रिदशादिभूपतिगृहाः पञ्चाधिका विंशतिः ॥२६॥

इति त्रिदशादिनवगृहाणि ।

भवननवकमुक्तं तच्चतुःशालमध्या-
न्नयनलघुमुखं स्याद्दक्षिणैकेन चन्द्रम् ।

"Aho Shrut Gyanam"

भवति सदनमध्ये सर्वतो दारुषट्कं
द्वितयमपि च तेषामन्तिमं युग्मयुक्तम् ॥२७॥

मलयमथ च गेहं वामह्रस्वाधिकं स्याद्
भवति च गुणह्रस्वं शोभनं सर्वतोऽपि ।
त्रिभिरपि च सुकर्णं पृष्ठयाम्ये तथैकं
तदधिकमपि वामे वेश्म नागेन्द्रसंज्ञम् ॥२८॥

चक्रं चतुष्टयमुखं सकलेषु शस्तं
याम्योत्तरेऽपि लघुना हि जयावहं स्यात् ।
[1]भारान्वितं च मकरध्वजमेव तस्य
पृष्ठाग्रह्रस्वमपि कामदमग्रभद्रम् ॥२९॥

इति विजयादि-नव-चतुःशालगृहाणि ।

शुद्धादयो मुनिमतेऽष्टविधा च शाला-
स्तासां षडेव कथिता भवनप्रसंगे ।
शालालिमध्यरचितोऽपि(?) लघुः सुखाय
यद्वा तदग्ररचिताः पृथगेव शालाः ॥३०॥

इति श्रीवास्तुशास्त्रे राजवल्लभमंडने द्विशाल-त्रिशाल-चतुःशाल-
गृहलक्षणवर्णनं नाम सप्तमोऽध्यायः ॥७॥

---

1. 'भद्राढ्यं च मकराङ्कयमेव तस्मिन्' इति पाठान्तरम् ।



"Aho Shrut Gyanam"

# अष्टमोऽध्यायः

शयनमथ नृपाणां त्वंगुलानां शतैकं
नवतिरपि सुतानां मंत्रिणः षड्विहीनम् ।
बलपतिगुणहस्तं त्र्यंगुलोनं गुरोश्च
तदनु युगलहीनं ब्राह्मणादेः प्रशस्तम् ॥१॥

व्यासोर्ध्वभागे नतदैर्घ्यतश्च
कलांशमात्रोऽधिक एव शस्तः ।
त्र्यंशेन पादेन समुच्छ्रयः स्यात्
द्वित्र्यंगुलानामधिको न कार्य्यः ॥२॥

श्रीपर्णी धनदाऽसनोऽपि गदहा वित्तप्रदा तिन्दुकी
वृद्धिः शिशुपयाथ शाकशयने शर्मापि शालैः कृते ।
आयुः पद्मकजे च चन्दनमये शत्रुक्षयः स्यात् सुखं
श्रेष्ठं चैकमयं[1] शिरीषजनितं पर्यंकयानासनं ॥३॥

इति शयनम् ।

सिंहासनं चोत्तममङ्गुलानां
षष्ट्या दशोनं च परं तथैव ।
दशांशवस्वंशमतो विहीनं
व्यासे च दैर्घ्यार्द्धसमुच्छ्रयः स्यात् ॥४॥

मुनिभिरथ [2]शरैर्वा भद्रभागत्रयं स्या-
दुदय इह विभागैर्भाजिते पीठमष्टौ ।

---

1. 'चकमला' इति पाठान्तरम् । 2. 'शिवै'रिति पाठान्तरम् ।

"Aho Shrut Gyanam"

कनकमपि रसांशं सप्तधा ग्रासपट्टी
शिवनवमुनिरत्नैर्दंतिवाहौ नृवेद्यौ ॥५॥

छाद्यं स्याद्रसभागमेव तिथितो भागेन कक्षासनं
युक्तं स्तम्भयुगेन तोरणयुतं रत्नैः शुभै राजितम् ।
कर्त्तव्यं नृपवल्लभं मतिमता ज्येष्ठं च सिंहासनं
ज्ञातव्यं च यशोभिवर्द्धनमितैः सिंहैर्नृकक्षासनम् ॥६॥

नरा[वा ?]स्तु वेदी पुनरेव छाद्यं सुखासनं तोरणसंयुतं स्यात् ।
पीठं च कुम्भं कलशो विटंकमुत्तुङ्गसंज्ञं सह छाद्यकेन ॥७॥

पीठे गोहरिवेदिके च सुयशश्छाद्येन सिंहासनं
हस्ती मातृकवेदिकासनयुतं तद्दीपचित्रं भवेत् ।
छत्रं ज्येष्ठमशीतिवेदसहितं द्वासप्ततिर्मध्यमं
षष्ट्या कन्यसमंगुलैर्नरपतेर्देवं शतार्द्धं शुभम् ॥८॥

इति सिंहासनच्छत्राणि ॥

वातायनो लुम्बिकया विहीनो बुधैस्तथोक्तस्त्रिपताक एव ।
द्विलुम्बिकाख्योभयसंज्ञकश्च यः स्वस्तिकोऽसौ युगलुम्बियुक्तः ॥९॥

स्याद्बाणैः प्रियवक्त्र एव सुमुखः षड्भिः पुनश्चेति च
छाद्यैकेन युतः सुवक्त्र उदितो द्वाभ्यां प्रियङ्गो भवेत् ।
एकोनः परिपद्मनाभ उदितस्तद्दीपचित्रो युगैः
वैचित्रः शरपंक्तिभिस्तु विविधाकारैर्युतः पञ्च च ॥१०॥

सिंहो दैर्घ्यविवर्द्धितो हि पृथुले हंसो गवाक्षो भवेत्
[1]कुम्भोऽसौ मतिदोऽपि भद्रसहितो ज्ञेयस्तु बुद्ध्यर्णवः ।

1. 'सौम्योऽसौ' इति पाठान्तरम् ।

"Aho Shrut Gyanam"

द्वारेणैव युगास्त्रकेण गरुडः पत्तद्वये जालकं
प्रोक्ताः पञ्चदशैव रूपमदला वेद्यादिकक्षासनैः ॥११॥

इति पञ्चदश गवाक्षाः ।

सभा च नन्दा परतोऽथ भद्रा जया च पूर्णा क्रमतोऽपि दिव्या ।
पद्मी च रत्नोद्भविकोत्पलाष्टौ बुधैर्विधेयावनिपालगेहे ॥१२॥
क्षेत्रं चतुष्टयपदैरपि षोडशांशं मध्ये तुरीयपदमेकपदो लघुश्च ।
नन्दा च भद्रसहिता च पदेन भद्रा तद्भेदतश्च जयदा लघुना च
पूर्णा ॥१३॥

दिव्या सभा केवलनन्दभागा भद्रैश्चतुर्भिः सहिता च पद्मी ।
रत्नोद्भवा स्याद् युगतोऽपि तुल्यैस्तथोत्पलाख्या प्रतिभद्रतश्च ॥१४॥
स्तम्भैस्तोरणराजितैश्च मदला निर्यूहवैतानकै-
र्लुच्छाद्यैर्गजसिंहवाजिविविधैर्नृत्यान्वितैः शोभितम् ।
रत्नस्फाटिकरङ्गभूमिनृपतेः क्रीडास्पदं मण्डपं
कुर्याद्दक्षिणभद्रकेण रुचिरं तन्मध्यतो वेदिकाम् ॥१५॥

इति सभाष्टकम् ।

वेदी कोणचतुष्टयं च सकले पाणिग्रहे स्वस्तिका
कल्याणं रविकोणकैश्च नृपतेः स्याद् भद्रिका सर्वदा ।
कोणैः श्रीधरिका च विंशतिमितैस्तिस्त्रोऽमराणां गृहे
[1]कर्णैरष्टभिरन्विता च शुभदा चण्डार्चने पद्मिनी ॥१६॥
विप्रे सप्तकरा च भूपभवने षट् पञ्च वैश्ये तथा
कुर्याद्धस्तचतुष्टयं च वृषले त्रिद्व्येकतो हीनके ।

1. कोणैरिति पाठान्तरम् ।

"Aho Shrut Gyanam"

तस्योर्ध्वे च नरेश्वरासनमतो माण्डं चतुःस्तम्भकं
हेम्ना मौक्तिकपट्टकूलमणिभिः सौम्यान्वितं राजितम् ॥१७॥

इति वेदिकाचुतष्टयम् ।

दीपस्तम्भं त्रिकरमुदये षड्भिरूनं क्रमेण
हस्तान्तं तं विहितमपि तैः पीठकुम्भान्वितं च ।
दीपस्योर्ध्वे कनककलशं शोभितं कङ्कणाद्यैः
कुर्याद्धातोरथ तरुमतो नागवङ्गे विवर्ज्ये ॥

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने शयन-सिंहासन-छत्र-गवाक्ष-सभाष्टक-वेदिका-चतुष्टय-दीपस्तम्भलक्षणं नाम अष्टमोऽध्यायः ॥

"Aho Shrut Gyanam"

# नवमोऽध्यायः

गृहा वास्तुशास्त्रोदधौ राजयोग्या अनन्ता हि संत्यत्र तेभ्यः
किथन्तः ।
मयोक्ताश्च योग्या नृपाणां समृद्ध्यै सुशोभान्वितास्ते च
कल्याणदाश्च ॥१॥

विशालं गृहं दिक्त्रये ह्रस्वयुग्मं मुखे वीथिकाग्रे च षड्दारुमध्यम् ।
गुणालिन्दचातुर्दिशं चैकवक्त्रं गवाक्षं च कोणे च भद्रे विधेयम्
॥२॥

मुखे भद्रके श्रीधरं माण्डयुक्तं तथा भूमिका पञ्चसप्तैकभूम्याम् ।
विनाच्छादनं मण्डपं वेदवक्त्रैं रिपुघ्नं गृहं राज्यवर्द्धन्यमेतत् ॥३॥

मध्ये निम्नं त्वंगनाग्रं तथोच्चैः शस्तं दैवं पुत्रनाशाय गेहम् ।
स्तम्भश्रेणी मध्यमानेन कार्या न्यूनाधिक्ये नैव पूजा न च श्रीः ।४।

हीनस्तम्भे शालयोर्बाह्यपट्टे नो वेधः स्यादन्यतो वेध एव ।
भूमेर्ज्ञेयं रुद्रसंख्या प्रमाणं तुल्या नेष्टा वर्धमानाः शुभाः स्युः ॥५॥

सार्द्धत्रयेण विभजेत् करतत्त्वसंख्यं मध्ये नवांशमुदितं च
करार्द्धभित्तिः ।
स्तंभाश्च षोड़श गृहेऽपि च भद्रकेषु दन्तैर्मिताश्च सकलासु
चतुर्मुखं स्यात् ॥६॥

भद्रं च भूमिद्वयमूर्ध्वमाण्डं सार्द्धत्रिभूमं कथितं च गेहम् ।
प्रतापवर्द्धन्यमिदं नृपाणां लक्ष्मीविलासं च वदामि तस्मात् ॥७॥

"Aho Shrut Gyanam"

स्तम्भा दश दश भद्रश्चैकं षोड़श मध्ये ततुसमरूपम् ।
मदनशरावनिमाण्डसमेतं लक्ष्मीर्नर्मं करोति च नित्यम् ॥८॥

भागाः पञ्चगुणाश्च पञ्चभवनं षट्त्रिंशता स्तम्भकैः
कुड्ये चार्द्धपदे च नन्दपदकैर्भद्रं चतुर्द्वारके ।
भद्रे वै गुणभद्रकाणि सकलेऽष्टाशीतिकाः स्तम्भकाः
माण्डं भूत्रितये च सार्द्ध शरभूः स्यात् श्रीनिवासं गृहम् ॥९॥

मध्ये स्तम्भशतं च भागसमके भित्ती चतुर्द्वारकं
सप्ताशाद्रिशरांशरामसहितं भद्रं चतुस्त्रिंशता ।
षट्त्रिंशद् द्विशती च तत्र सकलाः स्तम्भाः क्षितौ पूर्वतो
नाम्नैतत् कमलोद्भवं च कथितं भूसार्द्धसप्तान्वितम् ॥१०॥

हर्म्यस्योदयकं विभज्य नवधा कुम्भी भवेद् भागतः
पादोनं भवनं शिरश्च कथितं पादः सपादो भवेत् ।
स्तम्भः पञ्चपदोनभाग उदितः कोणाष्टवृत्तस्तथा
भागार्द्धेन जयन्तिका निगदिता सा तन्त्रकस्योपरि ॥११॥

गृहस्योदयं दिग्विभागैर्विभज्यं द्विभागेन कक्षासनं वेदिका स्यात् ।
त्रिभागेण ततुकण्ठतो निम्नमेवं गृहस्योदयार्द्धेन पीठं
नृपाणाम् ॥१२॥

उत्तानपट्टो नृपमन्दिरे स्यात् हस्ते च हस्ते द्वियवोन्नतोऽसौ ।
पाषाणतः सौख्यकरो नृपाणां धनक्षयं सोऽपि करोति गेहे ॥१३॥

सुधेष्टके शर्करया वियुक्ते सकर्करैस्तैः सुदृढ़ा गृहे भूः ।
शस्ता न शस्तं भवनेषु चित्रं कपोतगृध्राः कपिकाकरौद्रम् ॥१४॥

"Aho Shrut Gyanam"

शुद्धोऽलिन्दविशेषतश्च सकला भूम्यो वरं ज्यान्विताः
छाद्येनाथ च मत्तवारणयुतं माण्डं तथार्द्धोदयम् ।
मौड़ो भद्रचतुष्किकाभिरुदितो माण्डेन युक्तस्तथा
मल्लैस्तुल्यसपादकैस्तु मुकुलो वा शीर्षकैः शेखरः ॥१५॥

राज्ञो गृहं छन्दचतुष्टयं स्यात्तथैव घण्टाकलशेन युक्तम् ।
तुङ्गारसंज्ञस्त्वथ सिंहकर्णः प्रासादके तेऽपि षड़ेव शस्ताः ॥१६॥

षड्जातिगेहं तृणपर्णपट्टै र्वंशैः कटैश्चाथ मृदा शिलाभिः ।
छाद्यं प्रकारैः कथितं च षड्भिर्लोकप्रसिद्ध्यापि परीक्षणीयम् ।१७।

इति राजगृहादिलक्षणम् ।

वामे भागे दक्षिणे वा नृपाणां त्रेधा कार्या वाटिका क्रीड़नार्थम् ।
एकद्वित्रिर्दण्डसंख्या शतं स्यान्मध्ये धारामण्डपं तोययन्त्रैः ॥१८॥

क्षेत्रं सप्तविभागभाजितमतो भद्रं च भागत्रयं
तन्मध्ये जलवापिका जिनपदैरेकांशतो वेदिका ।
स्तम्भैर्द्वादशभिश्च मध्यरचितः कोणेषु कूपान्वितः
कर्त्तव्यो जलयन्त्र एष विधिवद् भोगाय पृथ्वीभुजाम् ॥१९॥

तस्यां चम्पककुन्दजातिसुमनोवल्ल्यश्च निर्वालिका
जाता हेमसमानकेतकिरपि श्वेता तथा पाटला ।
नारिङ्गः करणी वसन्तलतिका चारक्तपुष्पादिकं
जम्बीरो बदरी च पूगमधुका जम्बुश्च चूतद्रुमाः ॥२०॥

माल्लूरः कदली च चन्दनवटावश्वत्थपथ्ये शिवा
चिञ्चाऽशोककदम्बनिम्बतरवः खर्जूरिका दाडिमी ।

"Aho Shrut Gyanam"

कर्पूरागुरुकिंशुका हयरिपुः पुन्नागको निम्बुकी
प्रोक्ता नागलता च बीजनिभृता स्यात्तिन्दुको लाङ्गली ॥२१॥

द्राक्षैला शतपत्रिका च बकुला धत्तूरकङ्कोलकौ
शालस्तालतमालकौ मुनिवरो मन्दारपारिद्रुमौ ।
अन्ये भोग्यविचित्रखाद्यसुफलास्ते रोपणीया बुधै-
[1]र्यान् प्राप्नोति च भूतले शुभतरून् तच्चम्पकान् वापयेत् ॥२२॥

आस्थानं प्रतिषेचनाय च घटीयन्त्रस्तु सारो भवेत्
दोला स्त्रीजनखेलनाय रुचिरे वर्षावसन्तोत्सवे ।
बालाप्रौढवधूसुमध्ययुवतीगानैर्मनोहारिभिः
ग्रीष्मे शारदकेऽथ शीतलजलक्रीड़ा शुभे मण्डपे ॥२३॥

इति वाटिका ।

तुरङ्गमाणां गृहवामभागे शाला चतुःषष्टिकरा विधेया ।
शतार्द्धतो मध्यमिका च दैर्घ्यं कनीयसी तैर्दशभिर्विहीना ॥२४॥

व्यासे च ज्येष्ठा तिथिहस्तमाना त्रयोदशैकादशकैः क्रमेण ।
तद्बाह्यभित्तिश्च करप्रमाणा पञ्चार्द्धपञ्चाब्धिकरोदया स्यात् ॥२५॥

तेजोहानिमनीहया[2] विदधते पूर्वापरास्या नृणां
ते याम्योत्तरतोमुखा हि सततं कीर्त्तिर्यशो धान्यकम् ।
कर्तव्यं धिषणं प्रतीह कलशस्थानं द्विहस्तोदयम्
तस्यास्तोरणमुच्छ्रुतं च मुनिभिर्हस्तैः सुशोभान्वितम् ॥२६॥

षष्ट्या साधुहयोंगुलैर्निगदितो वेदांगुलेनाधिकः
श्रीवत्सस्त्वहिलाव एव च मनोहारी द्विसप्तांगुलः ।

1. 'यथाप्नोति च' इति पाठान्तरम् । 2. -'मपीहया'—इति क्वचित् पाठः ।



"Aho Shrut Gyanam"

रागाङ्ग्यंगुलकैस्तु वाजिविजयोऽशीत्या तथा भैरवः
शान्त्याख्यस्तु युगाष्टमात्र उदये मानं हरेः सप्तधा ॥२७॥

इति अश्वशाला ॥

सिंहद्वारं पूर्वमानेन कार्यं त्रिद्व्येका वा मालिका स्तम्भशीर्षे ।
स्यातां मध्ये ताड़कौ रक्षणार्थं तुल्यौ भागेनाधिकौ वापि सार्धौ
॥२८॥

भागे दक्षिणवामके च करिणां शाला हरेर्द्वारतः
कर्त्तव्या सुदृढोन्नता च कलशैर्घण्टादिभिर्भूषिता ।
सङ्कीर्णो रसनो नगैर्निगदितो मन्दो मृगश्चाष्टतः
सर्वं पूत्तमभद्रजातिरुदितो नन्दैः करैरुच्छ्रितः ॥२९॥

ला ।

अष्टोत्तरं हस्तशतं पृथुत्वे भूभृद्गृहं चोत्तममेत्र तत् स्यात् ।
अष्टाभिरष्टाभिरतो [1]विहीनं पञ्चैव भागाधिकतोऽपि दैर्घ्यं ॥३०॥

अशीतितो रागकरैर्विहीनाः पञ्चालया भूपसुतप्रियाणाम् ।
त्रिभागदैर्घ्येऽधिकता विधेया गृहाः क्रमेणैव यथोदिताश्च ॥३१॥

प्रोक्तं चतुःषष्टिकरं पृथुत्वे क्रमेण षड्भिस्तु करैर्विहीनम् ।
षड्भागतो दैर्घ्यमतोऽधिकं स्याद्बलाधिपस्यैव च पञ्च [2]वृद्धैः ॥३२॥

षष्ट्या हस्तैर्मन्त्रिगेहं पृथुत्वे हीनं हीनं पञ्चकं वेदवेदैः ।
कुर्याद्धस्तैरष्टमांशाधिकोऽसौ व्यासादग्रे वर्द्धितो दैर्घ्य एव ॥३३॥

सामन्तादिकभूपतेश्च भवनं विंध्यब्धिहस्तैः समं
हस्तैर्वेदविहीनकैः क्रमतया भागाधिकं दैर्घ्यतः ।

1. 'विहीनान्येवं च'—इत्यपि पाठः क्वचित् । 2. -'वृद्धया'—इति पाठान्तरम् ।

"Aho Shrut Gyanam"

दैवज्ञं च सभासदश्च गुरुतः पौरोधसं भैष
विंशत्यष्टकरं द्विहस्तरहितं दैर्घ्ये द्विधा तद्भवेत् ॥३४॥
वेश्याकञ्चुकिशिल्पिनामपि गृहे वेदाधिका विंशति-
र्मानं हस्तचतुष्टयैर्विरचितं दैर्घ्ये द्विधा व्यासतः ।
हर्म्यं द्यूतकरान्तिकस्य र[रु?]चितो हस्तैः समं विस्तरे
हीनं त्वर्द्धकरेण पञ्चकमिदं तुर्यांशदैर्घ्याधिकम् ॥३५॥
द्वात्रिंशतो मानमिदं द्विजादेर्हीनं चतुर्भिः क्रमतो विधेयम् ।
दिगष्टरागाब्धिविभागतश्च क्रमेण तद्वर्णचतुष्टयेऽपि ॥३६॥
कर्णाधिकं विस्तरतोऽधिकं वा शीघ्रं विनाशं समुपैति गेहम् ।
द्वारं नतं मूर्ध्नि [1]यदाग्रतश्च तत् सन्ततेर्हानिकरं प्रदिष्टम् ॥३७॥
व्यासे सप्ततिहस्तवियुक्ते शालामानमिदं मनुभक्ते ।
पञ्चविंशत् पुनरपि तस्मिन् मानमुशन्ति लघोरिति वृद्धाः ॥३८॥
एकद्वारं प्राङ्मुखं शोभनं स्याच्चातुर्वक्त्रं धातृभूपेशजैने ।
युग्मं प्राच्यां पश्चिमे स्यात् त्रिकेषु मूलद्वारं दक्षिणे वर्ज्जनीयम्
॥३९॥

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने राजगृहादिलक्षणं नाम
नवमोऽध्यायः ॥ ९ ॥

---

1. 'यदाग्रजं(?)चेत्'—इत्यपि पाठो दृश्यते ।

"Aho Shrut Gyanam"

# दशमोऽध्यायः

छाया चानू रेणुकेशाग्रलिक्षायूकाः प्रोक्ताः स्याद्यवस्त्वंगुलं हि ।
छायादिभ्योऽष्टघ्नमानस्य वृद्धिः प्रोक्तो हस्तो जैनसङ्ख्यांगुलैश्च ॥१॥

व्यासेन दैर्घ्यं गुणिते यदैक्यं तत् कोणक्षेत्रस्य फलं प्रदिष्टम् ।
पिण्डे तदैक्यं पुनरेव ताड्यं खातस्य भित्तेश्चयनादिसिद्धिः ॥२॥

करे करघ्ने च करप्रमाणं करांगुलीनां गुणमेव सङ्ख्या ।
स्यादंगुलैरंगुलताड़ितैश्च लब्धं फलं जैर्नविभाजितेन ॥३॥

वृत्तव्यासत्रिगुणपरिधिर्व्यासषड्भागयुक्तो
विस्ताराधं परिधिदलमन्योऽन्यनिघ्ने यदैक्यम् ।
पिण्डेनैवं पुनरपि ततस्ताड्यते खातसिद्ध्यै
भित्त्यादेर्वा स्फुटफलमिति क्षेत्रवृत्तस्वरूपम् ॥४॥

वृत्तस्य यः परिधिरब्धिविभागकघ्नो
व्यासस्य चैक्यफलमुक्तमिदं हितज्ञैः ।
दैर्घ्ये पृथुत्वगुणिते च यदैक्यमस्मात्
पञ्चांगुलान्यपहरेत् करतः फलं स्यात् ॥५॥

घनीकृतव्यासदलं निजैकविंशांशयुग् गोलफलं घनं स्यात् ।
व्यासस्य सप्तांशपुनः[युतः?]सुवृत्ते व्यासस्त्रिनिघ्नः परिवेशकायः
॥६॥

वृत्तक्षेत्रे परिधिगुणितव्यासपादः फलं तत्
क्षुण्णं वेदैरुपरि परितः कन्दकस्यैव जालम् ।
गोलस्यैवं तदपि च फलं पृष्ठजं व्यासनिघ्नं
षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यम् ॥७॥

"Aho Shrut Gyanam"

जीवाशरैक्यस्य(?) दलं शरेण हत्वास्य वर्गं दशभिर्विगुण्यम् ।
अङ्कैर्विभक्ते सति लब्धमूलं प्रजायते चापफलं स्फुटं तत् ॥८॥

मूलावशेषं हि तदेकयुक्तं जिनाहतं संयुतमंगुलैश्च ।
द्वाभ्यां युतेन द्विगुणेन मूलेनाप्तं स्फुटं तत् फलमुक्तमाद्यैः ॥९॥

अष्टास्रकस्य पृथुलेन दैर्घ्यं गुण्यं हि तद्वागत्रिभागहीनम् ।
षड्भागकस्याष्टयुगांशभागं कुर्याद्विहीनं पुनरेव शेषात् ॥१०॥

यत् षोड़शास्रं रसभागहीनं तद्वर्गमूलस्य षडंशकस्य ।
शक्रांशहीनं कथितं पुनश्चेत् शेषैर्बुधैर्वास्तुमतानुसारि ॥११॥

सर्वं मानं ज्ञायतेऽभ्यासयोगात् हीनाधिक्यं स्थानयोगेऽग्रतोऽपि ।
अन्यत्क्षेत्रे वैषमं वा समं वा ज्ञेयं लोकाल्लक्षितस्तत्र धीरैः ॥१२॥

इति खचित(?)व्यवहारः ।

यद्वृत्तं परिलेखकेऽन्यैर्लिखितं यन्मत्स्यपातास्ततः
षट्कोणं रसबाहुकं तदुदितं बाहुर्भजेत् सप्तभिः ।
सप्तास्ते रसभागबाहुरुदितः सप्तास्ततोऽष्टास्तकं
तद्वन्नन्ददशादिबाहुबहुशो ज्ञेयाः स्वबुद्ध्याखिलाः ॥१३॥

षड्बाहोर्वा बाहुरस्येषुभागे युक्तो बाहुः पञ्चकोणस्य स स्यात् ।
यावान् बाहुस्तेन मानेन गुण्यो बाह्वोर्योगं तस्य मूलं विकर्णः ॥१४॥

दैर्घ्यात् पृथुत्वं जिनभागहीनं तिथिप्रमाणाः कथिता भुजाश्च ।
पञ्चास्रमेतत् परिलेखनीयं पुष्पेषुकेष्वेव हि तस्य रूपम् ॥१५॥

आयामतो विस्तरमष्टमांशं हीनं प्रकुर्याद्रथकारसुज्ञः ।
दैर्घ्यार्धदैर्घ्येण समास्तदस्रयन्त्रादिषट्कोणकमेतदुक्तम् ॥१६॥

"Aho Shrut Gyanam"

अष्टाश्रयं[स्त्रं यत्?] तत् पृथुत्वे च दैर्घ्ये तुल्यं कार्यं
कर्णवैकण्णीं(?)हीनम् ।

चातुःकोणं हस्तमेयं यदा स्याद्बाहुस्तस्मिन्नंगुलैर्द्विकप्रमाणैः ॥१७

षष्ठो विभागोऽपि[च?] दैर्घ्यकस्य तस्यैव षड्भागयुतो विधेयः ।
बाहुप्रमाणं कथितं कलास्त्रे त्रेवे तथान्यानि विचार्य कुर्यात् ॥१८॥

इति क्षेत्रसूत्रेण(?) ।

श्येनः कपोतवकपेचकभासगृध्रा-
श्चिल्हः शृगालमृगशूकरसिंहकेशाः ।
इत्यादयो धनहरा भवने प्रतिष्ठा
गेहं यदा कटकटायति कम्पते वा ॥१९॥

प्राकारदेवभवने नृपमन्दिरे च
चैत्ये ध्वजादिषु यदद्भुतमेव दृष्टम् ।
इत्यादिकं सुदृढमेव पतत्यकस्मा-
त्तद् भूपतेर्भयकरं गृहिणां गृहेषु ॥२०॥

स्थानेषु पूर्वविहितेष्वपि तोरणे च
द्वारे गृहे भवति चेन्मधुवामलूरौ ।
स्थूणाकपाटदृढकोष्ठकभङ्ग एव
भूमेर्विहार इति मृत्युकरं वदन्ति ॥२१॥

द्वारे गृहस्यापि विशेद् भुजङ्ग-
स्तदा विनाशं कुरुते गृहिण्याः ।
तत्रैव दुर्गा प्रकरोति नीडं
रटत्युलूकोऽपि विनाशहेतुः ॥२२॥

"Aho Shrut Gyanam"

रोगाय तैलघृतभक्तवसादिधारा
दुःखं भवेद् गृहपतेर्यदि रक्तधारा।
वादित्रगीतनिनदो भवनेऽप्यकस्मात्
सञ्जायते यदि तदा कथयत्यसौख्यम् ॥२३॥

गेहेऽद्भुतं यदि तदा भवनं विहाय
कुर्याद्बलिं च विधिवद् भवने सुरार्चाम्।
दानं द्विजाय यतिदुर्बलदुःखितेभ्यो
दद्यात्ततोऽपि निवसेद् भवने सुखार्थी ॥२४॥

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने सयित-चेत्राद्भुतलक्षणं नाम
दशमोऽध्यायः ॥१०॥

"Aho Shrut Gyanam"

# एकादशोऽध्यायः

नन्दा तिथिः षट् प्रतिपच्च रुद्रा द्विर्द्वादशी सप्तमिका च भद्रा ।
जया तृतीयाऽष्टमिका च विश्वा रिक्ता चतुर्थी नवमी च भूता ॥१॥

पूर्णा प्रोक्ता पञ्चदिक्पौर्णमासो नन्दा शुक्रे राजपुत्रे च भद्रा ।
पृथ्वीपुत्रे सिद्धिदा वै जया स्यात् मन्दे रिक्ता देवपूज्ये च पूर्णा ॥२॥

एकादशी जीवदिने च षष्ठी भौमे त्रयोदश्यपि शुक्रवारे ॥
सूर्ये तथैकाष्टमिका च सिद्धाश्चन्द्रे द्वितीया दशमी-नवम्यौ ॥३॥

रवौ शुभान्यश्विनिकं च मूलं पुष्योऽपि हस्तोत्तरकत्रयं च ।
दुष्टा मघा द्वादशिका च याम्यं मैत्राह्वयं सप्तमिका विशाखा ॥४॥

शुभानि चन्द्रे श्रवणानुराधे पुष्यो मृगो रोहिणिका तथैव ।
न शोभनैकादशिकाभिजिच्चाषाढाद्वयं चित्रविशाखके च ॥५॥

भौमे शुभं वह्निभमश्विनी चाश्लेषा च मूलोत्तरभद्र एव ।
नेष्टा दशम्युत्तरषाढभं च तथा त्रयं वासवतश्च रौद्रम् ॥६॥

बुधे शुभौ पुष्यकरौ मृगश्च ब्राह्मचाग्निभं सिद्धिकरं च मैत्रम् ।
वर्ज्या धनिष्ठा प्रतिपन्नवम्यौ याम्याश्विनी रेवतिका तथैव ॥७॥

जीवेऽश्विनी सिद्धिकरानुराधा पुनर्वसू रेवतिका च पुष्यः ।
न शोभनं वारुणमष्टमी च ब्राह्मीत्रयं चोत्तरकाग्निधिष्ण्यम् ॥८॥

शुक्रे शुभं पौष्णमृगं च यूका श्रुत्युत्तराषाढभमैत्रभं च ।
वर्ज्या भृगौ सप्तमिका च पुष्योऽश्लेषा मघा रोहिणिका तथैव
॥९॥

"Aho Shrut Gyanam"

शनौ शुभा रोहिणिका श्रुतिश्च स्वातिस्तथा वारुणभश्च शस्तम् ।
न शोभनं चोत्तरकात्रयं च षाढ़ाद्वयं रेवतिका च षष्ठी ॥१०॥

सूर्ये रूपरसद्विकाः शशिदिनेऽष्टौ पञ्च चैकस्तथा
चत्वारो मुनयोऽष्ट भूमितनये षट्त्र्यष्ट चन्द्रात्मजे ।
जीवे युग्मशराः स्वरा भृगुसुते रागैकवेदाष्टमा
मन्देऽष्टौ गुणसप्तपञ्च दिवसेऽष्टांशाः शुभा वासरे ॥११॥
कृष्णे निशायां दशमी तृतीये भद्रादिने सप्तचतुर्दशी च ।
शुक्ले रजन्यां युगरुद्रसङ्ख्ये दिनेऽष्टमीपूर्णिमयोर्विवर्ज्याः ॥१२॥

सूर्ये कार्मुकमीनगे सुरगुरौ सिंहे विधौ दुर्बले
गण्डान्तव्यतिपातवैधृतदिने दग्धे तिथौ भेऽथवा ।
शुक्रेज्येऽथ गुरौ च पातसमये विष्ट्यां च मासाधिके
चन्द्रे पापविलोकिते च सहिते कार्यं न किञ्चित् शुभम् ॥१३॥

इति दिनशुद्धिः ।

अथ गृहनिवेशाः ।

आदौ भूमिपरीक्षणं शुभदिने पश्चाच्च वास्त्वर्चनं
भूमेः शोधनकं ततोऽपि विधिवत् पाषाणतोयान्तकम् ।
पश्चाद्वेश्मसुरालयादिरचना पादस्य संस्थापनं
कार्यं लग्नशशांकशाकुनबलैः श्रेष्ठे दिने धीमता ॥१४॥

वास्तोः कर्मणि धिष्णवारतिथयोऽश्विन्युत्तराणां त्रिकं
हस्तादित्रयमैत्रतोद्वयमिदं पुष्यो मृगो रोहिणी ।
नेष्टौ भूसुतभास्करौ च शुभदा पूर्णा च नन्दातिथि-
र्नेष्टा वैधृतिशूलगण्डपरिघा व्याघातवज्रावपि ॥१५॥



"Aho Shrut Gyanam"

विष्कुम्भव्यतिपातकौ च न शुभौ योगाः परे शोभनाः
शस्तं नागबबाह्वतैतिलगरं युग्मां तिथिं वर्जयेत् ।
मौहूर्त्तं त्वथ विश्वमष्टनवमं पञ्चत्रिरागाद्रिकं
श्रेष्ठं च द्वितयं तुला वृषघटौ युग्मं धनुःकन्यके ॥१६॥

द्व्यङ्गे वा स्थिरभे च सौम्यसहिते लग्ने शुभैर्वीक्षिते
सौम्यैर्वीर्यसमन्वितैश्च दशमे निर्माणमाहुर्बुधाः ।
तैर्वा धीनवकेन्द्रगैस्तु फलदं पापैस्त्रिषष्ठायगैः
क्रूरो ह्यष्टमसंस्थितोऽपि मरणं कर्त्तुर्विधत्तेतराम् ॥१७॥

जीवः सौख्यमपाकरोति भृगुजो धान्यं श्रियं चन्द्रमाः
सूर्यो वेश्मपतिश्चतुष्टयमिदं नीचास्तगं निर्बलम् ।
जीवे लग्नसमागते शशिसुते यामित्रगेऽर्के रिपौ
शुक्रेऽब्धौ सहजे शनौ च शरदां गेहं शतं तिष्ठति ॥१८॥

भृगुसुत इह लग्ने ह्यायगेऽर्के च खे ज्ञे गृहमपि शतमष्टं स्थायि केन्द्रे सुरेज्ये ।
द्विगुणमपि च शुक्रे मूर्त्तिगे विक्रमेऽर्के सुरगुरुसुतसंस्थे भूमिपुत्रे च षष्ठे ॥१९॥

प्रारम्भकाले यदि मन्दभौमौ लाभाश्रितौ देवगुरुश्चतुर्थः ।
चन्द्रो वरे चेच्छरदामशीतिः स्थितिर्नियुक्ता भवनस्य सद्भिः ॥२०॥

लग्नं कर्कटमाश्रिते हिमकरे देवार्चिते केन्द्रगे
लक्ष्मीवर्द्धवनं खगैश्च सुहृदः स्वांशोच्चसंस्थैस्तथा ।
नीचांशैरपि निर्धनं च खचरो ह्येकः परांशं स्थितो
यामित्रे दशमेऽब्दमध्यत इदं गेहं परैर्नीयते ॥२१॥

"Aho Shrut Gyanam"

भृगुर्विलग्ने यदि मीनसंस्थः कर्के गुरुस्तुर्यगृहं गतश्च ।
शनिस्तथैकादशगस्तुलायां गेहं चिरं श्रीसहितं तदा स्यात् ॥२२॥
सौरादिकत्रितयमस्य शिरः प्रयुक्तं
भानां ततो द्वितयमग्रपदे च दत्ते ।
कुक्षौ चतुष्कमपि दक्षिणगे प्रशस्तं
पृष्ठत्रयं त्रितयमप्य[थ?] पुच्छभागे ॥२३॥
पाश्चात्त्यपादयुगले द्वितयं द्वयं स्या-
च्चत्वारि भानि च ततः खलु वामकुक्षौ ।
देवाग्रय[द्वे चाग्र्य?]वामचरणे द्वितयं च वक्त्रे
त्वेवं वदन्ति मुनयः खलु तस्य चक्रे ॥२४॥
शीर्षस्थिते सुखनिवृत्तिरथाग्रपादे
शून्यं च दक्षिण[ग]कुक्षिगते धनं स्यात् ।
पृष्ठे शुभं भयकरं खलु पुच्छगे भे
पाश्चात्त्यपादयुगले विविधा गुणाः स्युः ॥२५॥
दुःखं भयं स्यात् किल वामकुक्षौ भयं विनाशश्च मुखेऽग्रपादे ।
विद्वद्भिरेवं खलु वास्तुखाते [श्री?]वत्सचक्रेण निरीक्षणीयम् ॥२६॥

इति गृहनिवेशः ।

गृहप्रवेशो मृग-मैत्र-पुष्ये चित्रा-धनिष्ठोत्तरवारुणर्क्षे ।
स्वात्यश्विनीपूषभरोहिणीषु शुभोऽथ रिक्तारविभूमिजे न ॥२७॥
अजवृषमृगकन्याः कर्कमीनौ तुलार्का-
द्विहितमिह समुच्चं सप्तमं नीचमस्मात् ।
क्रियमृगघटकर्काद्या नवांशा अजाद्ये
चरलवमपि लग्नं वर्जनीयं प्रवेशे ॥२८॥

"Aho Shrut Gyanam"

मूर्त्तौ तथैवोपचये स्वराशिर्लग्नं यदा स्यात् सुखकृत् प्रवेशः ।
द्विवेदपंचास्तनवाष्टमान्तो राशिः स्वलग्नं च विनाशहेतुः ॥२६॥

त्रिकोणकेन्द्रेषु भवन्ति सौम्याः केन्द्राष्टमांत्येन विनैव पापाः ।
भवन्ति शस्तास्त्रिषडायगाश्च चन्द्रेऽनुकूले स्थिरभे प्रवेशः ॥३०॥

गृहप्रवेशं गमनं न कुर्यात् शुक्रे बुधे दक्षिणसम्मुखेऽस्ते ।
नवोढ़कन्यैकपुरे भयादौ न दोषदौ सम्मुखदक्षिणौ तौ ॥३१॥

पूज्योऽसौ कुलदेवता गणपतिः क्षेत्राधिनाथस्तथा
वास्तुर्दिक्पतयः प्रवेशसमये प्रारम्भणे धीमता ।
आचार्यं द्विजशिल्पिनश्च विधिवत् सन्तोषयेत् शिल्पिनं
वस्त्रालंकरणैर्गृहे प्रविशतः सौख्यं भवेत् सर्वदा ॥३२॥

इति गृहप्रवेशः ।

तन्वंग्याः करपीड़ने मृगमघामूलं तथैवोत्तरा
हस्तस्वात्यनुराधकाश्च सुखदाः पौष्णं तथा रोहिणी ।
यस्याः स्यात् सुमुखं नितम्बजघने स्थूले कुचौ श्रीफलौ
तुल्यौ क्षामकटिर्विशालनयने ताम्रोऽधरः सत्कचाः ॥३३॥

शुक्रेज्येऽस्तगे[मिते?] सुकुन्दशयने सूर्ये धनुर्मीनगे
भद्रायां यममृत्युवेधसहितं गोधूलकं वर्जयेत् ।
युक्तं पञ्च विशोपकैर्विधुबलं शस्तं विवाहस्य भे
दोषाणां शमनं विलोक्य कृतिना सन्ध्यागमे निर्मितम् ॥३४॥

गोधूलेऽष्टमषष्ठमूर्त्तिषु विधुं लग्नेऽष्टमेऽस्ते कुजं
सा[या?]म्यक्रान्तिसमानमेव कुलिकं मृत्योर्भयाद् वर्जयेत् ।

"Aho Shrut Gyanam"

ऐन्द्रार्द्धे प्रथमे ध्रुवस्य च परे क्रान्त्योस्तु साम्यं भवेद्
भानोर्बिम्बसमन्विते सुखकरं मन्देऽथ जीवेऽन्यथा ॥३५॥

मासे जन्मतिथौ तथैव निजभे ज्येष्ठे न ज्येष्ठोत्सवाः
षण्मासान्न विवाहमुण्डनविधिर्भ्रात्रोः सहोदर्ययोः।
षष्ठे वा त्रितये तथैव नवमे लग्नान्न कार्यं दिने
वेदीवर्णपवारकादि(?)सकलं पाणिग्रहात् पूर्वतः ॥३६॥

इति विवाहमुहूर्त्तम् ।

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने दिनशुद्धि-गृहनिवेश-गृहप्रवेश-विवाह-मुहूर्त्तलक्षणं नामैकादशोऽध्यायः ॥११॥

"Aho Shrut Gyanam"

# द्वादशोऽध्यायः

प्राक्पक्षे धवले शशी यदि शुभः पुंसां स पक्षः शुभः
कृष्णे चेदशुभस्तदा शुभकरो व्यत्यासतो निष्फलः।
तारावीर्यवशात् शशी विधुबलादिष्टो रवेः संक्रमः
शस्ता भानुबलाद् भवन्ति खचरा दुष्टाः स्थिता गोचरे ॥१॥

सर्वे ग्रहा लाभगताः शुभाः स्युस्त्रिषड्दशार्कस्तु तथैव राहुः।
शनिस्त्रिषष्ठः शुभकृत् कुजश्च क्रूरा ग्रहा गोचरमेव राशेः ॥२॥

चन्द्रः षट्त्रिदशाद्यसप्तमशुभः शुक्रोऽङ्कपञ्चद्विगो
ज्ञो युग्मेऽन्त्यविवर्जितः सुरगुरुर्धर्मास्तधीयुग्मगः।
शुक्रोऽस्तारिविवर्जितश्च सकले चन्द्रः सदालोक्यते
होरा सार्द्धघटीद्वयं निजदिनात् षष्ठो भवेत् सर्वदा ॥३॥

षड्विंशतिर्द्वादशभिः पलैश्च दिनप्रमाणं मकरेऽह्नि पूर्वे।
त्रिंशत्तुलामेषदिने तु षष्ठे मृगे दिनं कर्कटरालिमानम् ॥४॥

पञ्चांशयुक्तपलमेव मृगे च युग्मे
मेषे झषे त्वनुदिनं त्रिपलं च सार्द्धम्।
अष्टाक्षरेण रहितं त्रिपलं घटाद्गो
वृद्धिक्षयौ मकरकर्कटतोयनादैः ॥५॥

मेषादिस्त्रिकरेन्दुखेन्दुनयनं रामाब्धिपञ्चर्तवः
पञ्चाब्धिक्रमतोंगुलैश्च समता माध्याह्निकी स्यात् प्रभा।
छाया सप्तमितस्य सप्तसहिता शङ्कोश्च मध्योदिता
तैस्तत्सम[स?]गुणं भजेद् दिनदलं याता स्थिता नाड़िका ॥६॥

इति दिनरात्रिमानम्।

"Aho Shrut Gyanam"

भानोर्दक्षिणनाड़िका शशिवहा वामा सुषुम्णा तयोः
प्राक् कृष्णे रविरिन्दुरेव धवले पक्षे त्र्यहं च त्र्यहम्।
शान्ते कर्मणि चन्द्रमा दिनपतिः प्रोक्तो भये भोजने
पूर्णाङ्गे यदि पृच्छकस्तदखिलं कार्यं व्रजेत् सिद्धये ॥७॥

भानुश्चन्द्रसमोदये दिनकरे चन्द्रस्तथोर्ध्वे गणो
द्यूनात् सम्मुख ऊर्ध्वगो हिमकरे पृष्ठे ह्यधो भानुगः।
सूर्ये चेद्विषमः समश्च हिमगोः प्रश्नस्तदा सिद्धये
मध्ये भूधर आप ऊर्ध्वमनलस्तिर्यङ्मुखो दुष्टदः ॥८॥

नभो वहेत् संक्रमणेतिदुष्टः शून्ये कृते मृत्युमुपैति शत्रुः।
उर्व्याश्च तत्त्वे सकलार्थसिद्धिं हन्यान्न चाग्नौ जलभूमितत्त्वे ॥९॥

इति शरीरस्वरोदयः।

अथ बालादिपञ्चस्वरविचारः

ऊर्ध्वाधोरेखा रससंख्याभिन्ना एकादशभिस्तिर्यक्।
अकछारुध भवानंदाभोऽर्के रेवत्या मुनयः(?) ॥१०॥

इखजटनमशाभद्रास्तिथयश्चन्द्रो ज्ञो वै पुनर्वसु।
पश्च ऊगऊतययखाजया गुरुश्च तूत्तरका पञ्चकं क्रमेण ॥११॥

एघटथफरसरिक्ता शुक्रस्त्वनुराधापञ्चकमृक्षं तु।
ओचटदवलह पूर्णा मन्दः श्रुतिपञ्चकं लिखेत् स्वरचक्रे ॥१२॥

अकारपंक्त्यां वृषमेषराशी लिखेत् षड् शान् मिथुनस्य पूर्वान्।
त्रिंशस्तदग्रे मिथुनस्य कर्कः सिंहस्तदग्रे हि तुला च कन्या ॥१३॥

"Aho Shrut Gyanam"

अंशास्तृतीयेऽपि च वृश्चिकाद्यास्तदन्तचापे मकराच्च षट्कम् ।
तुर्ये तथा पञ्चमके मृगस्य त्र्यंशा विलेख्या अपि कुम्भमीनौ ॥१४॥

प्रसिद्धनामादिमवर्णमात्रा या म ृकासौ गमने च युद्धे ।
तिथौ च वर्णाः स्वर एव चिन्त्याः सर्वत्र कार्ये स्वरराज एषः ॥१५॥

बालः कुमारस्तरुणोऽथ वृद्धो मृत्युः स्वरः पञ्चमगः स्ववर्णात् ।
तिर्यक् क्रमेणापि विचिंतनीयः सर्वत्र संग्रामविधौ विशेषात् ॥१६॥

बालो नराणां कुरुतेऽल्पलाभमर्द्धं कुमारस्तरुणः समग्रम् ।
हानिस्तु वृद्धो मरणं मृतिश्च युद्धोद्यमे बालमृती न शस्तौ ॥१७॥

इति बालादिपञ्चस्वरविचारः ।

प्राकारचक्रं तु भणाम्यथातो यत्र स्थितो वैरिषु दुर्जयोऽरिः ।
ईशानबाह्ये पुरभं विलेख्य कोणे प्रवेशं दिशि निर्गमं च ॥१८॥

बाह्ये लिखेद्द्वादशभानि कोणे ह्यष्टौ तथा मध्यगतानि चाष्टौ ।
मध्ये शुभा जीवभृगुज्ञसौम्याः क्रूरास्तु बाह्ये गड़रक्षणाय ॥१९॥

क्रूरा मध्ये घ्नंति मध्यं तु कोणे कोटं बाह्ये वेष्टकांश्च क्रमेण ।
मध्ये दुष्टाः सौम्यखेटाश्च कोटे भेदैर्भङ्गः स्याद् विना युद्धकेन ॥२०॥

मध्ये सौम्याः कोटबाह्ये तु दुष्टा दुर्गं खण्डे नैव भङ्गः कदाचित् ।
पापा मध्ये सौम्यखेटास्तु दुर्गे बाह्येऽपि स्युस्तत् प्रयच्छन्ति पौराः ॥२१॥

क्रूराक्रूरा मध्यकोटे तु बाह्ये युद्धं कुर्युर्दारुणं सैन्ययोस्ते ।
मध्ये बाह्ये यत्र दुष्टा ग्रहाः स्युः स्थायी यायी तत्र यत्नं विदध्यात् ॥२२॥

"Aho Shrut Gyanam"

आदित्ये जलनाशनं हिमकरे भङ्गः कुजे वह्निभीः
सौम्ये बुद्धिबलं गुरौ तु घटतोमध्ये सुभिक्षं जलम्।
स्यात् शुक्रे चलचित्तता रविसुते रोगो नृणां वा मृती-
राहौ भेदभयं ध्वजे तु वृषभीदुर्गेऽथवा वेष्टके ॥२३॥

इति कोटचक्रम्।

सर्वे व्ययाष्टमगताः सकला नृशस्ताः
केन्द्रत्रिकोणधनगास्तु तथैव पापाः।
सौम्यान्वितोऽपि विधुरेव शुभो न लग्ने
मूर्त्तौ तथैव निधने न शुभं शुभेषु ॥२४॥

दशमतृतीये नवपञ्चमे च तथा चतुर्थाष्टमकं कलत्रम्।
पश्यन्ति खेटा इह पादवृद्धया फलानि चैवं क्रमतो भवन्ति ॥२५॥
पापायुक्तो वीक्षितो वापि सौम्यैर्यो भावः स्यात्तस्य वाच्या हि सिद्धिः।
हानिः पापैः क्रूरसौम्यैस्तु मिश्रं सर्वेष्वेवं चिन्तनीयं स्वबुद्धया ॥२६॥

सोमेज्यो ज्ञकविः शनिश्च दशमे सर्वे ग्रहा द्वादशे
रन्ध्रे चन्द्ररवी तनौ च निशिपः षष्ठेऽस्तगा ज्ञादयः।
सूर्ये क्षेत्रपतेः सुखे च हिमगौ प्रोक्ता कुजे शाकिनी
भूता देवजनोद्भुजश्च पितरो ज्ञे जीवशुक्रे शनौ ॥२७॥

इति लग्नविचारः।

योगीश्वरीं गणपतिं कमलां च नत्वा
श्रीमातृकाक्षरमयं शकुनं प्रवक्ष्मि।
विद्या चतुर्दशमयो परमा हि माया
आदिस्वराक्षरपदादिकचितुस्वरूपा ॥२८॥



"Aho Shrut Gyanam"

अमर एण इला ऋषि ईश्वरा उर्द्ध उष्टतृविसर्गफलप्रदा ।
अन्ध आर्त्त उखषद्दस्वरा एवमत्यशुभदाः शुभकार्यें ॥२६॥

कर्णौ गणेशधनचामरछत्रचुल्हि
व्यालीवकारफलभद्रपणकारडिम्भि ।
वल्मीहरोर्द्धनयकारशकारखण्डं
तन्वी च सौख्यफलदा नवचन्द्रवर्णाः ॥३०॥

खरो विषं रोगदरिद्रपापं सर्वं जड़त्वं मरणं च नाशम् ।
ढिङ्कारबद्धं धङ्याश्च वर्णाः सर्वेषु कार्येष्वपि निष्फलाः स्युः ॥३१॥

इति मातृकाशकुनम् ।

( अथ महादशाविचारः )

पूर्वस्यां भचतुष्टयं च शिवतः कोणे त्रिकं स्थापितः
षट् सूर्ये तिथयो विधौ क्षितिसुते ह्यष्टौ समाः स्याद्दशा ।
ज्ञे सप्तेन्दुसमा दिशश्च रविजे जीवे नवेन्दुस्तथा
राहौ द्वादश रूपयुक् च भृगुजे क्रूरस्य दुष्टा दशा ॥३२॥
वर्गं वर्गैर्गुण्यमङ्कैर्विभक्तं लब्धा मासास्त्रिंशता शेषमेवम् ।
गुण्यं भक्तं पूर्ववद्वासराः स्युः प्रोक्ता मध्येऽन्तर्दशाः खेचराणाम्
॥३३॥

इति श्रीवास्तुशास्त्रे राजवल्लभमंडने गोचर-दिनरात्रिमान-स्वरोदय-
कोटचक्र-मातृकालक्षणं नाम द्वादशोऽध्यायः ॥१२॥

"Aho Shrut Gyanam"

# त्रयोदशोऽध्यायः

पूर्वात्रयं सार्प्यमाग्निधिष्णमधोमुखं मूलमघाविशाखाः ।
खाते च भूम्यां निधिरोपणे च तथोग्रकार्ये मुनयो वदन्ति ॥१॥
चित्राश्विमैत्रादितिवायुपार्श्वं ज्येष्ठामृगौ पौष्णकरौ तथैव ।
स्याद्वाहने यन्त्रहलप्रवाहे चतुष्पदाद्येपि च पार्श्ववक्त्रं ॥२॥
पुष्योत्तरार्द्राश्रवणं धनिष्ठा स्याद्रोहिणी वारुणमूर्ध्ववक्त्रम् ।
प्राकारदेवालयछत्रहर्म्यराजाभिषेकादि च याति सिद्धिम् ॥३॥
सीमन्तगर्भाष्टमषष्ठमासे कार्यं दिनेऽर्कस्य गुरोर्महीजे ।
मृगे च पुष्ये च पुनर्वसौ च हस्ते च मूले श्रवणे तथैव ॥४॥
षष्ठे शिशोः पञ्चमके कुमार्या मासेऽन्नसम्प्राशनमुत्तरासु ।
श्रुत्यश्विनीवासवहस्तपुष्ये चित्रामृगादित्यविधातृपौष्णे ॥
वेधः शिशूनामपि कर्णयोः स्यात् पुष्योत्तरावासवरेवतीषु ।
हस्ताश्विनीवैष्णवचित्रकासु पुनर्वसौ मैत्रमृगेषु शस्तः ॥६॥
मौञ्जीबन्धो मोचनं च द्विजानां जीवे शुक्रे भूमिपुत्रे बुधे च ।
कार्यो हस्तादित्रये वासवेन्त्ये श्रुत्यादित्ये पुष्यसौम्याश्विनीषु ॥७॥
विद्यारम्भविधौ सुरेज्यभृगुजौ शस्तौ बुधार्कौ तथा
जाड्यं चन्द्रदिने च मन्दकुजयोर्मृत्युश्च दर्शे तिथौ ।
आद्या चाष्टमिका महेश्वरतिथिस्त्याज्याथ मूलं शुभं
पूर्वाकर्णकरत्रयाश्विभमपि श्रेष्ठं मृगात् पञ्चकम् ॥८॥
आधानमग्नेस्तिसृपूत्तरासु ज्येष्ठाविशाखामृगपुष्यभेषु ।
सरेवतीब्रह्मभकृत्तिकासु कुर्याद्द्विजः कर्मविधानसिद्ध्यै ॥९॥

"Aho Shrut Gyanam"

क्षौरं पुष्टिकरं हरित्रयकृतं हस्तत्रये पौष्णभे
ज्येष्ठाश्विन्यदितौ च पुष्यमृगभे स्यादह्नि ताराबले ॥
रिक्तायां न शुभं च भास्करदिने मन्दारयो रात्रिषु
ब्राह्मयं चोत्तरभत्रयं च पितृभं मैत्राग्निभं मृत्यवे ॥१०॥

शुक्लाम्बरं भास्करजीवशुक्रे बुधे विधार्यं करपञ्चके च ।
पुष्याश्विनीपूषभ उत्तरासु पुनर्वसौ वासवरोहिणीषु ॥११॥

हेमविद्रुमशङ्खकाचमणयो दन्तोऽपि रक्ताम्बरं
स्त्रीणां सौख्यकरं च भौमभृगुजे जीवे रवौ पौष्णभे ।
हस्तात्पंचसु वासवे शुभदिने भर्तुः सुखार्थप्रदं
रोहिण्युत्तरमन्दचन्द्रदिवसे नादित्यपुष्ये तथा ॥१२॥

दृष्टिर्नृपस्य तु मृगोत्तरहस्तपुष्ये
चित्रान्त्ययुग्महरिधात्रिधनिष्ठमैत्रैः ।
चित्राख्यवासवविमुक्तकशक्रयुक्तै
राज्याभिषेक उदितो हि बुधैः समृद्ध्यै च ॥१३॥

राजा स्वकर्माणि कभ[र]त्रये च पुनर्वसौ पुष्यमृगाश्विपौष्णे ।
श्रुतित्रयं चैव तथापि मैत्रे ह्यत्रैव भैषज्यविधिः समूले ॥१४॥

स्वातौ पूर्वा-सार्प्य-ज्येष्ठासु रौद्रे रोगोत्पत्तिर्मृत्यवे मानवानाम् ।
सार्पे मूले रुद्रयाम्याग्निमैत्र्ये वैशाखायां सर्पदष्टस्य मृत्युः ॥१५॥

नो रोगमुक्तस्य च सोमशुक्रे स्नानं विधेयं तिसृषूत्तरासु ।
सार्प्ये च मैत्रे च पुनर्वसौ च स्वात्यां तथा धातृभपौष्णभे वै ॥१६॥

"Aho Shrut Gyanam"

[स्नानं?]न जन्तुषु हितं भृगुभौमजीवे
षष्ठीत्रयोदश[?]द्वितीयाष्टसूर्ये ।
संक्रान्तिपर्वदिवसे न हितं तु विष्टयां
स्त्रीणां मघाशतभिषगूनवमीबुधेषु ॥१७॥

स्नानं प्रसूतैः[तिः?] पितृभे भरण्यां पुनर्वसौ वह्निभमूलपुष्ये ।
श्रुत्यार्द्रचित्रासु विशाखिकायां कुर्यान्निषेधाय पुनः प्रसूतेः ॥१८॥
गमागमौ नैव शुभौ पशूनां स्नानं श्रुतौ वापि तथोत्तरासु ।
दर्शाष्टमी ब्रह्मभचित्रयोश्च भवेच्चतुर्थ्यां न च भूतनाम्न्याम् ॥१९॥
त्याज्येयं तिथिरष्टमी च नवमी भूताश्चतुर्थी कुहूः
पूर्वाणां त्रितयं यमाग्निफणिभं ज्येष्ठा तथार्द्रा हले ।
शेषैर्विंशतिधिष्ण्यकैस्तु फलदं मन्दार्कभौमांस्त्यजेद्
बीजोप्तौ च विशाखिकादितिहरी त्याज्यौ तथा वारुणम् ॥२०॥
लतौषधीपादपरोपणेषु पूर्वा धनिष्ठा भरणी विवर्ज्याः ।
पुनर्वसुः स्वातिमघा च रौद्रं साप्याग्निज्येष्ठाश्रवणं न शस्तम् ॥२१॥

नाद्यं(?) सुखाय करवारुणवासवेषु
ज्येष्ठोत्तरात्रितयपूषणि मित्रपुष्ये ।
तोये मघोत्तरकरे वसुमैत्रपुष्ये(?)
स्यात्तोयभे च वरुणे च विधातृभे च ॥२२॥

यात्रा पुष्यमृगे श्रुतावदितिभे हस्ताश्विनीवासवे
रेवत्यां फलदा च मैत्रदिवसे चित्रात्रिकं वर्जयेत् ।
साप्र्ये वह्निमघासु शैवयमभे वर्ज्यं गुरोर्दक्षिणे
प्राक् सोमे च शनौ जलेऽर्ककवितः सौम्यां बुधे मङ्गले ॥२३॥

"Aho Shrut Gyanam"

प्राच्यां कुबेराग्निदिशो विभागे
नैरृत्ययाम्ये वरुणेऽनिलेशे ।
योगिन्यथोक्ता प्रतिपन्नवम्योः
यानेऽभिमुख्यः क्रमतोऽपि दुष्टाः ॥२४॥

मेषे वृषे मिथुनकर्कटकादिराशौ
प्राग्याम्यपश्चिमकुबेरदिशासु चन्द्रः ।
यात्रासु दक्षिणकरेऽभिमुखेऽर्थलाभो
धान्यक्षयो भवति वामकरे च पृष्ठे ॥२५॥

धनस्य वृद्ध्यै च धनसंग्रहे च
श्रुतित्रयं पुष्यपुनर्वसू च ।
हस्तौ मृगान्त्याश्विभमैत्रचित्राः
स्वातिर्गृहीता न तु शेषमृक्षम् ॥२६॥

सौम्यायने धवलपक्षविमानचित्ते
द्व्यङ्के स्थिरेऽमरगणस्य हिता प्रतिष्ठा ।
युग्मा तिथिर्न शुभदा नवमी तथामी
श्रेष्ठा शुभेषु विषमा दशमी द्वितीया ॥२७॥

पूर्वा भाद्रपदोत्तरात्रयमृगे ब्राह्मेषु ज्येष्ठाद्वये
पूर्वाषाढपुनर्वसू श्रुतिकरस्वात्यश्विनीवासवे ।
रेवत्यार्द्रभपुष्यमैत्रदिवसे श्रेष्ठं सुरस्थापनं
चक्रे सप्तशलाकके च न हितं क्रूरस्य वेधे कुजे ॥२८॥

क्रूरास्त्रिषष्ठदशमायगताः[शुभाः?] स्यु-
स्तद्वत्त्रिकोणधनकेन्द्रगताश्च सौम्याः ।

चन्द्रो दशायसहजेषु धने च शस्तो
जीवोऽष्टमः शशिसुतोऽपि धनाय कैश्चित् ॥२९॥
मूर्त्तौ मृत्युकरः शशी धनगतो धान्यं सुखं विक्रमे
वेश्मस्थः कलहङ्करः सुतगतः सन्तानगोत्रक्षयम् ।
षष्ठे वैरिभयं च सप्तमगतो दुःखं मृतिं मृत्युगो
विघ्नं धर्मगतो बलं च गगने लाभेऽर्थदोऽन्त्ये व्ययम् ॥३०॥
कार्यं सदा शान्तिकपौष्टिकं च कन्याविवाहर्क्षगणेषु पुष्ये ।
श्रुतौ तथार्केऽश्विभशुक्रसोमे बुधे च जीवे फलदं प्रशस्तम् ॥३१॥

इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने ज्योतिषलक्षणं नाम
त्रयोदशोऽध्यायः ॥१३॥

"Aho Shrut Gyanam"

# चतुर्दशोऽध्यायः

तिथिवारर्क्षयुतेऽपि गुणौघे किमपि न कार्यं शकुनविरुद्धे ।
तेषामनुकूलेऽपि च दोषे शकुने सिद्धिमुपैति सदैव ॥१॥

प्राग्दग्धा शिवदिक् सुरेश्वरदिशि ज्वालाग्निदिग् धूमिता
सौम्या भस्मयुता च भास्करवशात् शान्ताश्चतस्रः पराः ।
प्रत्येकं प्रहराष्टकेन सविता संसेवतेऽष्टौ दिशः
शान्तात् सर्वसमीहितं च शकुना दीप्तोभयादौ(?)शुभाः ॥२॥

चेष्टास्थानं स्वरगतिदिशो भावकालौ च सप्त
शान्ता दीप्ता विदधति नृणां सूचनं तत्फलस्य ।
सद्योनष्टे युवतिविषये व्याधिदुर्गादिभीतौ
प्रावेशेयं शकुनमुदितो यात्रिकादन्यथाद्यैः ॥३॥

छत्राम्भोजगजाजवाजिसुरभीवीणायुधं चामरं
भेरीशङ्खनिनादमर्द्दलसुरा गीतं च वेदध्वनिः ।
मत्स्या गोमयमृत्तिके च पललं दीपोऽम्बुकुम्भो भृत-
स्ताम्रं रौप्यसुवर्णमम्बरनृपैर्मध्वाज्यदूर्वा दधि ॥४॥

भृङ्गाराञ्जनवाहनं द्विजपयःशाकार्द्रपुष्पं फलं
वेश्या दर्पणमङ्कुशौषधसमित् सिद्धान्नवर्द्धापनम् ।
दृष्ट्वा दक्षिणपार्श्वगानि गमनं कार्यं सदा धीमता
पृष्ठे गच्छ पुरेहि मङ्गलगिरा यात्रा च सिद्ध्यै भवेत् ॥५॥

तैलाङ्गारकचाश्मभस्मफणिनः कार्पासलोहाजिनं
तक्रावस्करकृष्णधान्यलवणं काष्ठास्थिविष्ठा वसा ।

"Aho Shrut Gyanam"

पिण्याकस्तुषरज्जुशृङ्खलगुडं पङ्को घटो रिक्तको
नासाहीनविनग्नमुण्डितवमतुप्रव्राजकं बन्धिकाः ॥६॥

दीनः केशविमुक्तकोऽपि हृद[नु ?]मानारु[रण्य ?]को गर्द्दभः
सोष्ट्रः सैरिभवाहनोऽपि रुदितश्चेत्यादिकं वर्ज्जयेत् ।
द्वाराघातबिड़ालयुद्धकलहं रक्ताम्बरव्यत्ययो
मा गच्छ क च यासि तिष्ठ-वचनं यात्रानिषेधाय च ॥७॥

श्यामा पिङ्गलिका शिवा परभृता छुच्छुन्दरी शूकरी
पल्लीनां स्वरवामजः शुभकरः पुंसंज्ञिकानां तथा ।
श्येनो भासकपी मयूररुरवः श्रीकण्ठकच्छिप्पिका
शस्ता दक्षिणवासिताश्च शकुनाः स्त्रीसंज्ञका ये च ते ॥८॥

चापं खञ्जनबर्हिणं च नकुलं स्याच्छब्दकीर्त्तिक्षणं
शस्तं डाहकशौकरोरगशशं गैधं च संकीर्त्तनम् ।
सिद्धैश्च दृष्टिरवौ च भल्लकपिरौ नो कीर्त्तनं सिद्धिदं
नो गच्छेत् पथि लङ्घितैश्च शशकैर्गोधाविड़ालोरगैः ॥९॥

स्थानानीह शुभानि तोरणगृहप्रासादभूभृद्ध्वजाः
छायाभूः सुमनोहरा च सजलाः क्षीरद्रुमोद्दालकाः ।
नेष्टाः शृङ्गकपालशुष्कपतिता वृक्षास्तथा कण्टका
दग्धा(स्थि)च्छिन्नमहीरुहोष्ट्रमहिषाः केशोपदाद्याः पराः ॥१०॥

शान्तो(?)चामरवस्तुतारगमनं भक्षग्रहो मैथुनं
नृत्यं दक्षिणचेष्टितं च सुजले स्नानं च शीताश्रयाः ।



"Aho Shrut Gyanam"

वृक्षारोहणसम्मुखी च मुदिता पक्षद्वयोत्क्षेपणं
श्यामाया इति चेष्टितं च फलदं दुष्टं वदामस्त्वथ ॥११॥

वामं पक्षमपक्षपेत् प्रकुरुते चेष्टां च वामां वमिं
नाश-त्रास-वियोगकम्पनमथो व्यावृत्य विज्रम्भणम् ।
पङ्के भस्मनि मज्जनं विदधती रज्ज्वस्थिकेशान् मुखे
वक्रास्या विदधाति मूत्रशकृती रोमाञ्चितं भीतये ॥१२॥

तारा दक्षिणगा च वामककुभः स्याद्वामगा वामिका
ऋज्वी चोर्ध्वगतिश्च वक्रगमना वक्रोर्ध्वगा मूर्ध्निगा ।
कापाटी च कपाटवच्च गुलिका बक्त्र्याण्डवद्दूरगा
लीनान्धापि च पृष्ठगा च हरिविद्धा याति सा दुर्दुरी ॥१३॥

ऋज्वी सिद्धिकरी तथोर्द्धफलदा वक्रा च वक्रं फलं
युद्धं चोर्ध्वगता कपाटिभयदा कायक्षयं गौलिका ।
दूरादूरफला तथार्श(?)गतिर्नेष्टामये पृष्ठगा
न्वन्धा चोर्ध्वमुखं करोति गतये तुच्छं फलं दुर्दुरा ॥१४॥

यात्रायां फलदस्तु वामनिनदोऽनर्थामये दक्षिणः
पृष्ठे पृष्ठफलं करोति पुरतो यात्रानिषेधे हि सा ।
याने वामनिनादतारगतयः प्रश्ने च शान्ते शुभा
अग्रे दक्षिणनादिता च गतयो वामाः प्रवेशादिषु ॥१५॥

तारा भयं हन्ति करोति युग्मं लाभं तृतीया बहुशोऽपि याने ।
वामा शुभं मृत्युवशं द्वितीया तथा तृतीया धनजीवनाशम् ॥१६॥

"Aho Shrut Gyanam"

वामे शब्दमुपैति च तारा शब्दं कृत्वा गच्छति वामा।
पुनरपि शब्दं कुरुते वामे सा बहुफलदा कथिता दुर्गा ॥१७॥

वामरवा यदि गच्छति तारा दक्षिणतोऽपि करोति च शब्दम्।
हंति फलं गतिजं कुरुते साप्यल्पफला प्रथमावरजातम् ॥१८॥

श्रेष्ठः खगश्च गमनेऽपि च तारयातो वामा प्रवेशसमये फलदा च दुर्गा।
चेष्टा-निनाद-गतयः स्थितिभक्तलाभौ सर्वं यथोत्तरबलं महते समूहः ॥१९॥

श्यामे तोरणसंज्ञिके च फलदे सव्यापसव्ये रवे
भूशब्दो(?) चिलिशूलितोऽथ जलगौ कूचिच्चिकुर्निःस्वनैः।
तौ वीचाचिलिकूचमारुतभवौ कीतूद्वयं जा[चा?]ग्निजं
दीप्तौ मारुतजौ च चीकुचिरिरी मिश्रोग्निवन्यौ शुभौ ॥२०॥

आदौ नता प्रान्तगतोन्नता या प्रागुन्नता चान्तगता नता चेत्।
यत् प्राप्यमल्पं चिरतोऽपि वस्तु सा भूरिदा स्यादचिरेण पुंसाम् ॥२१॥

इति दुर्गाशकुनविचारः।

रेवानद्या दक्षिणे देशभागे वामे पृष्ठे पिङ्गला सिद्धिदा स्यात्।
यात्राकाले दक्षिणाग्रे प्रशस्ता प्रोक्ता प्राज्ञैरुत्तरे देशभागे ॥२२॥

सर्वेषु देशेषु भये प्रवेशे रुतं प्रशस्तं खलु दक्षिणाङ्के।
शस्तं स्वदेशाद्विपरीतभावं स्त्रीणां कृतौ भूपनिरीक्षणे च ॥२३॥

इति पिंगलाशकुनम्।

"Aho Shrut Gyanam"

वामेयं गमने प्रवेशसमये श्रेष्ठा गतिर्दक्षिणा
शान्ते दक्षिणचेष्टितं च सकलं मूत्रादिकं सिद्धिदम्।
जृम्भालोलनछर्दिकासपतनं भग्नाङ्गविष्ठादिकं
वामं चेष्टितमङ्गधूननमपि त्याज्यं शुनोदीप्तिदम् ॥२४॥

वामं श्वानगतिः शुभाव गमने शून्या गतिस्त्वन्यथा
नो चेष्टां प्रतिपादने च शुनकी नो मूत्रयंती शुभा ।
ते कुर्वंति भयं रुजं च मुदिता वर्षासु वृष्टिं तथा
वामा वै विलवासिनश्च नखिनः श्रेष्ठाः प्रवेशेऽन्यथा ॥२५॥

इति श्वानः ।

गौरेणा विषमाः प्रदक्षिणगताः पुंसां प्रयाणे शुभा
नो वामा न समश्च कृष्णमलिता(?) सिद्धैय समा वामगा ।
नेष्टा दक्षिणगाश्च कृष्णविषमाश्चावेष्टनं मृत्यवे
कण्डू-कम्प-पूरीष-मूत्रमशुभं वामाः प्रवेशे शुभाः ॥२६॥

वामे च कौशिकशशौ खरजम्बुकौ च
गोवाजिसारसशुका अपि वायसाश्च ।
श्रेष्ठौ कपिञ्जलगणाधिपनामधेयौ
तौ दक्षिणे च गमने विशनेऽन्यथा तु ॥२७॥

श्रेष्ठाः प्रदक्षिणगता विषमाः प्रयाणे
एता वयांसि नकुलो नखिषु त्वपीह ।
सार्थं नृणां शकुन इष्टकरः स्वरोत्थो
वामे स्वरे वहति तारगतिः प्रशस्ता ॥२८॥

"Aho Shrut Gyanam"

प्रदक्षिणाः पूर्वदिशं पिपिल्यः शून्यस्तथेष्टा गमनं च सिद्धिः ।
वृष्टिं सुखं स्त्रीहरणं विदध्युर्धनं शुभं च क्रमतोऽर्थलाभम् ॥२६॥

याने शवे रुदितवर्जितकेऽर्थसिद्धि-
मृत्युः प्रवेशसमयेऽप्यथवा रुजश्च ।
वामं त्ववृष्टमपि रोदनमाह शस्तं
निंद्यं विड़ालनृगवां शुनकस्य च क्षुत् ॥३०॥

पूर्वस्यां मरणं करोति मुखतः शोकं च वह्नुयद्भवं
हानिं दक्षिणदिग्विभागजनितं रक्षोदिशीष्टागमम् ।
मिष्टान्नं ददते जलेशदिशिजं वायौ च लक्ष्मीप्रदं
सौम्यायां कलहं धनं पशुपतौ भीतिं स्वकीयं क्षुतम् ॥३१॥

स्पन्दो नराणां फलदोऽपसव्यः स्त्रीणां च वामाङ्गसमुद्भवश्च ।
हृदन्तनाभी-कटिपृष्ठजो वा नेष्टो नृणां वामशरीरजातः ॥३२॥

ऊर्ध्वप्रान्ते वामनेत्रे च भीतिं स्पन्दो दक्षे मध्य आदौ च दुःखम् ।
कुर्यात् सौख्यं सर्वतो दक्षिणाधो दुष्टो वामाधोऽपि मध्यान्तमूले ॥३३॥

प्रदोषकाले यदि वा प्रभाते लोके क्वचित् किञ्चन भाषमाणे ।
उपश्रुतिः कार्यसमुद्यतेन सार्वत्रिकी सा परिभावनीया ॥३४॥

शान्ताः पञ्च शिवारुते परदिशो दीप्तास्तु दग्धादिता
संत्रासव्ययबन्धनादिकमतः स्यादिष्टवार्त्ताश्रुतिः ।
इष्टाप्तिः शुभलाभमिष्टमशनं सङ्गः समं सज्जनैः
सिद्धैच वामनिनाद एष गमने प्रावेशके दक्षिणः ॥३५ ॥

"Aho Shrut Gyanam"

शीर्षे वल्ल्यारोहणे राज्यलाभं कर्णे भूषैश्वर्यमेवं हि लाभे।
नेत्रे मित्रं नासिकायां सुगन्धो वक्त्रे मिष्टान्नं कण्ठदेशे प्रियाप्तिः ॥३६॥

स्कन्धे जयो भुजगता प्रकरोति लाभ-
मर्थं करे सुभगतां स्तनगा च वल्ली।
हृत्कुक्षिपृष्ठकटिनाभिषु सौख्यपुत्रौ
लाभं तथा वरसंमागमकीर्त्तिवृद्धिः ॥३७॥

पार्श्वे बन्धुविवर्द्धनं च मरणं गुह्ये गुदे रोगदा
पू(ऊ?)रौ वाहनमर्थमेव तदधो जङ्घापदोः स्याद् गतिः।
एवं शौनकशुक्रगर्गमुनिभिः प्रोक्तं(?) वामनः
वल्ल्या वा सरटस्य दक्षिणसमारोहे फलानां क्षयः ॥३८॥

मूलाख्या ज्वलनी तथैव दहनी स्यात्तोरणं स्वष्टितो
वामो लुम्बुककः प्रमाण इति तत् स्यात् पश्चको मूलकम्।
पश्चत्वं खरकस्तथा भ्रमरकं प्रोक्तं ध्रुवो मा गृहं
तस्मात् पूर्णघटी महेश्वरदिशाः प्राच्यादिशाः षोड़श ॥३९॥

दीप्ताः सर्वदिशोऽपि भानुवशतस्तेनोज्झिताः शोभनाः
प्राक्मूलं शिखिवायुराक्षसदिशो दीप्तास्तथा शाङ्करी।
शान्ते दक्षिणपश्चिमे भृतघटी मातुर्गृहं पश्चमं
सिद्धैश्च लुम्बक एव लौकिकमते तूर्ध्वस्तथाऽधोऽधमः ॥४०॥

गो-छ्लाम्बुज-कुञ्जरेषु तुरगे सर्पे च पुरो(?)यदि
दृष्टः खञ्जनको ददाति स नृणां राज्यं सितो वासितः।
सौख्यं शान्तसमाश्रितः प्रकुरुते गेहे सदार्थक्षयं
श्वाने रज्जुखरोष्ट्रगं त्रिषु भयं सर्वत्र पीतं त्यजेत् ॥४१॥

"Aho Shrut Gyanam"

दुर्गागतिः पिङ्गलिकारुतं च चेष्टा शुनः स्थानकरी च काके ।
दिशः शिवायाः शकुने मुनीन्द्रै रेतद्विशेषात् कथितं बलिष्ठम् ॥४२॥

श्रीमेदपाटे नृपकुम्भकर्णस्तदंघ्रिराजीवपरागसेवी ।
स मण्डनाख्यो भुवि सूत्रधारस्तेनोद्धृतो भूपतिवल्लभोऽयम् ॥४३॥

गणपतिगुरुभक्त्या भारतीपादतुष्ट्या
मुनिमतमिदमुक्तं वास्तुशास्त्रं सुवृत्तम् ।
गणितमपि च सारं शाकुनं सारभूतं
भवतु चतुरयोग्यं विश्वकर्मप्रसादात् ॥४४ ॥

इति श्रीवास्तुशास्त्रे राजवल्लभमंडने···लक्षणं नाम
चतुर्दशोऽध्यायः ॥१४॥

* इति मंडनसूत्रधारीविरचिते राजवल्लभः समाप्तोऽयं । शके १७७६ जयनामसंवत्सरे
भाद्रपदवद्य ॥ भृगुवारे समापितं ।

---

* इदं लिपिकारस्य लिपिकालविज्ञापनम् ।

"Aho Shrut Gyanam"

"Aho Shrut Gyanam"